1323

M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 577

(58)

Title: Shabdashakti Prakashika

577

शब्दशक्तिप्रकाशिका। Incomplete

:	Shabdashakti prakāshika	:	Title
:	: Jagadeesha	:	Author
:	:	:	Editor
:	:	:	Year, Vols.
:	:	:	Publisher
577 :	: Ends abruptly	:	Remarks

शा० श्रीमन्महागणाधिपतये नमः ॥ ॐ ॥ तर्कतंत्रं च विदुषां विदुषां तोषकारिका । क्रियते जगदीशेन शब्दशक्तिप्रकाशिका ॥ १ ॥ ग्रंथारंभे विघ्नविघाताय समुचितां शब्दप्र
यीं देवतां ग्रंथकृत्स्मरति अनुभवहेतुः सकलैः सघः समुपासितां मनुजे साकांक्षासन्ना च स्वार्थयोग्या सरस्वती देवी ॥ २ ॥ इतरा देवतास्सम्यगुपासिताप्युपासकेन
साकांक्षा साकांक्षापि वा नासन्ना आसन्नापि वा न स्वस्योपासितुः अभिलषितार्थयोग्या योग्यापि वा न समस्तोपासकेऽनुभवस्य जनिका जनिकापि वा न स
घः किंतु कालक्रमेणैव सरस्वती देवी सकलैरेव मनुजे साकांक्षासन्ना योग्या चोपासिता सती सघ एवानुभवं तनुते अतो देवतान्तरमपास्योत्कर्षवतीयमस्य
मुपासितव्येत्यत्र तात्पर्यं शब्दोपि स्वार्थस्यानुभवे भवेद्धेतुः आसत्तिरेवोपनयिके तत्र का...धुपयोगः तद्भिन्ने चेतरानुमानादिवदेव न तत्र सघः साकांक्षा सत्यादिधीमात्र नं०
या व्याप्तिबुद्ध्यादेरप्यधिकस्यापेक्षणादिति शंकामपनेतुं अन्वयबोधनामकमनुभवान्तरं दर्शयति साकांक्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः सोयं नियंत्रितार्थत्वान्न प्रत्यक्षं न चा
नुमा अस्तितावद्गौरस्ति गामानयेत्यादिसाकांक्षशब्देभ्यः स्वस्वरूपस्यापदार्थानामुपस्थितेरनन्तरं गवादेरस्तित्वादेरन्वयावगाहि विलक्षणो बोधः तत्रान्वयव्यतिरेकाभ्यां आकां
क्षादिमत्तया शब्दस्यावगमो हेतुर्न तु पदार्थानामुपस्थितिमात्रं विशिष्य तत्रानुविधायकत्वात् अन्यथानुमितेरप्यपलापापत्तेः न चासौ स्मृतिः समानाकारसंस्काराद्यसत्त्वा
त् नापि साक्षात्कारः साकांक्षपदैर्नैव प्रकारान्तरेणापि उपस्थितार्थस्योपनयमर्यादयावगाहितापत्तेः न चेष्टापत्तिः अनुभवविरोधात् तत्तदर्थविषयकत्वेन शाब्दमतेरनु
व्यवसायेन प्रतीतेः तत्तदर्थसाकांक्षपदजन्यतद्गोचरशाब्दत्वेन विषयविषयिभावे हेतुत्वकल्पनाया अतिगौरवात् इतरबाधकेभ्यस्त्वपि इतरत्वादेरपदार्थस्यावगाहित्वेन शाब्दम
तेरनुव्यवसीयमानत्वात् गवादावस्तित्वादेरिवास्तित्वादौ गवादेर्भानप्रसंगस्य तावतानिरासाच्च अत एवासौ नानुमितिरपि पूर्वपरामर्शस्य वस्तुमात्रस्यैवासत्तिवाधैव
शाब्दधीविषयतापत्तेः न च तत्तदर्थगोचरशाब्दधियं प्रति साकांक्षपदजन्यायास्तदर्थगोचरस्मृतेः कारणत्वकल्पनेन दोषः तावतापि पदार्थानामन्वयधीदशायामप
दार्थानामपि स्वसामग्रीबलेन प्रत्यक्षानुमितेरन्यतरप्रसंगस्य दुर्वारतापत्तेः शाब्दधियः प्रत्यक्षत्वाद्यभ्युपगमे प्रत्यक्षादिसामान्यं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वावश्यकत्वात्
शाब्दान्यप्रत्यक्षत्वावच्छिन्नं प्रति तत्स्यास्तथात्वमवश्यं शाब्दधियः प्रत्यक्षादिभिन्नत्वकल्पनायामेव लाघवाच्च अथ लिंगजत्वेनान्वयबुद्धेरनुमितित्वसिद्ध्यावनायासा १
दनुमितिं तत्सामग्र्याः प्रतिबंधकत्वं वाच्यमतो लिंगजत्वमेव शाब्दधियः खंडयति योग्यतार्थ... गताकांक्षा शब्दनिष्ठानुमानिका प्रत्येकं वा मिलिता वा नैते लिं
गमसिद्धितः गवादावस्तित्वादेरनुवादार्थं तदावदस्तित्वादेर्बाधविरहितत्वरूपं योग्यतामात्रं लिंगं बाधनिश्चयाभाव नान्यथासिद्धस्य योग्यतानिश्चयस्यावश्यक
त्वात् योग्यतामात्रलिंगकसंसर्गानुमानस्यान्वयबुद्धित्वे घटः कर्मत्वमित्यादिस्थलीयस्यापि तस्य तथान्वयपातात् योग्यतासंशयस्थलेपि अन्वयबुद्धेरनुभावि

कत्वाच्च गवादावस्तित्वादेरन्वयबोधानुकूलानुपूर्वीपर्यवसितसाकांक्षत्वमसिद्धं कथमस्तित्वादेरन्वयं साधयेत् अत एवास्तित्वादेर्योग्यताविशिष्टमप्याकांक्षादिमत्त्वं न त
दन्वयस्यानुमापकमसिद्धेः अथ गौरस्तितावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकांक्षाश्रयपदस्मारितत्वात् घटवत् अस्तिपदसमभिव्याहृतगोपदस्मारितत्वाद्वा वस्तु
वदित्याद्यनुमानत एवास्तित्वान्वयधियोऽन्यथासिद्धिः पदानामेकवाक्यतापन्नत्वरूपसमभिव्याहृतनिश्चयं विना क्वापि नेयमन्वयबोधस्यानुत्पादात् पूर्वं तस्यावश्यकत्वात्
न च विनैकस्मादिनिवा घटत्वचक्षुरादेर्व्यभिचारः स्वार्थानुमानस्वरूपसतस्तस्याः किंचित्करत्वात् एकविधव्यभिचारग्रहसत्त्वेप्यन्यविधव्याप्तिनिश्चयस्य संभवाच्च समानप्रका
रस्यैव व्यभिचारग्रहस्य व्याप्तिधीविरोधित्वादिति नव्यवैशेषिकाः तन्न गवादेः पदस्मारितत्वाद्यभावग्रहदशायामुत्पन्नस्य गौरस्तीत्याद्यन्वयबोधस्योक्तहेतुनाऽनि
ष्पत्तेः पदजन्याहि पदार्थस्मृतिः स्वरूपसत्येवान्वयबुद्धावुपयुज्यते न तु ज्ञानप्रमाणाभावात् पदैः स्मारितत्वस्यापि पदस्मारितत्वग्रहात् अन्वयधीप्रसंगाच्च एतेन गोपदम
स्तित्ववत् गोज्ञानपूर्वकं अस्तिपदसाकांक्षगोपदत्वात् यन्नैवं तन्नैवं यथाकाशमित्येवं परपक्षकमप्यनुमानं केवलव्यतिरेकपक्षानुसारि यत्परास्तं गवादि
पदानां ज्ञानपूर्वकत्वाभावनिश्चयदशायामुत्पन्नस्य गवादिमुख्यधर्मिकास्तित्वाद्यन्वयबोधस्य स्वजनीनत्वात् लिंगादनिष्पत्तेः वाक्यार्थस्यापूर्वत्वेन त
त्पक्षसाध्यस्य प्रागनुपस्थितस्यानुमानायोगाच्च वस्तुतो वाक्यार्थबोधस्यानुमितित्वे स सेव साकांक्षपदादिलिंगकत्वकल्प्य तदेव तत्सिद्धप्रमाणाभावात् अ
स्तित्वेन गामनुमिनोमीत्याद्यनुव्यवसायस्य तत्रासत्त्वात् प्रत्युत गौरस्तीति वाक्यादस्तित्वेन गौः श्रुतो न त्वनुमितः इत्येवानुभवाच्च श्रोतव्यो मन्तव्य इत्यादि
प्रयोगदर्शनाच्छाब्दत्वस्यापि शक्यत्वात् शक्यतावच्छेदकत्वात् न चासौ भ्रान्तिः बाधकाभावात् न चेदनुमितिमात्रस्य पदजन्यत्वं प्रकल्प्यान्वयबोधत्वं किमिति निरो
चयेनुमितावेवान्वयमतावपि समानविषयकत्वप्रत्यक्षसामग्र्यादेः प्रतिबंधकतया तदभावजन्यत्वं नैकशेषस्य दुष्करत्वात् तत्पदादिशाब्दे स्मरणेस
ति तदीयव्याप्त्यादेरिव दहनाद्यर्थस्तदर्थकवह्न्यादिपदस्य स्मरणानन्तरं तदीयाकांक्षाद्यवगमस्यैकवचनत्वात् वाच्यतावच्छेदकस्यापि संबंधितस्मा
रकताया अविशिष्टत्वात् किंच घटादन्यघटस्याद्वाक्यात् घटप्रतियोगिकान्यत्वप्रकारेण निरवच्छिन्नविशेष्यताकोपि घटान्यस्य बोधः सर्वजनसिद्धः स चास्मा
कं तादृशानुपूर्वीकपदज्ञानत्वेन तथाविधान्वयबोधं प्रति हेतुत्वादुपपद्यते परेषां तु भेदो घटप्रतियोगिताकत्वत्साकांक्षान्यादिपदस्मारितत्वादित्यादिरी
त्यानुमित्सानताभिर्वाह पक्षविधया न्यत्वस्य भानेप्यन्यत्वप्रकारेण घटान्यस्य तत्राभानात् न च तत्रान्यपदमेव घटान्यत्वप्रकारेण घटान्यस्य लक्षणा घटादि
सस्यैवेत्यर्थापत्तेः अन्यथा घटोस्तीत्यादावपि घटादिपदस्यैवास्तित्वविशिष्टघटादिलक्षकत्वसंभवात् तत्राप्यस्तित्वघटयोरन्वयबोधापलापा
पत्तेरित्यास्तां विस्तरः साकांक्षत्वादेरिव वाक्यार्थज्ञानगोचरज्ञानवत्त्वरूपस्यापि तेनकत्वस्यापि निश्चयः शाब्दधीहेतुरतो नैकपदार्थे धर्मि

शा·प्र· कोपरपदार्थस्यान्वयबोधोऽनुमितिः सिद्धिसत्वेविनाऽनुमितिसांतत्संभवात् परंत्वनुमितेरन्यएव किंतुसोगृहीतग्राहित्वात्तन्नप्रामाण्यं यज्ज्ञा
तीयविशिष्टज्ञानत्वावच्छेदेनसमानाकारनिश्चयोत्तरत्वं तज्ज्ञातीयान्ययथार्थज्ञानस्यैवगृहीतग्राहित्वेनप्रमात्वाद्यतएव धारावाहिकप्रत्यक्षव्यक्ती
२ नांसमानाकारकग्रहोत्तरवृत्तित्वेपिनज्ञातत्वाप्रमात्वहानिः हानिस्तुसमानाकारानुभवसंसृष्टानांस्मृतीनां अरन्मीमांसकानांसमधातंनि
रस्यति· नापीकेतानुबोधकाद्यर्थराम्भज्ञानेनुपयुज्यते वाक्यार्थानामपूर्वत्वात् संशयेप्यन्वयोदयात् घटकपदार्थवदपरपदार्थपर्यवसन्नस्यवाक्यार्थस्यज्ञानव
दुक्ततरूपायाआप्तोक्तायानिश्चयः शाब्दमतेकारणंस्यात् स्यादपि तेनैवसाध्यनिश्चयेनप्रतिबंधादेकपदार्थपक्षिकायाः अपरपदार्थानुमितेरनुत्पादः नचै
वंशाब्दधियः सर्ववाक्यार्थस्योपस्थितिसनियमेनतत्पूर्वस्याप्तोक्तत्वस्यापिमतेरनवश्यकत्वात् अन्यथावेदस्याप्यनुवादकतापत्तेः एकपदार्थेउत्तरपदार्थस्यवा
क्यार्थज्ञानघटकत्वस्यसंशयेपिशाब्दमतेरुत्पादाच्च अतएवोक्तानांतस्यसंशयेव्यभिचारेकनिश्चयेचान्वयबुद्धेरनुत्पादः एवंच तन्निश्चयस्तत्रहेतुरिसपिप्रत्युक्तम
सिद्धेः ननुमानदशायांतस्यनिश्चयानुरोधेनसिद्धसाधनं तात्पर्यस्यतत्त्वात् निश्चयस्यान्वयधीहेतुत्वात् अन्यथाकघटकर्मत्वादिपरत्वाभावस्यघटकर्मत्वाद्य
न्यमात्रपरत्वस्यवानिश्चये घटमित्यादिवाक्यात् घटीयकर्मत्वमित्याद्यन्वयबोधापत्तेरितिचेन्न कर्मताधर्मिकघटाद्यन्वयधीपरत्वाभावनिश्चयकालेप्रम
यत्वादिरूपेण घटकर्मत्वादिपरत्वस्यनिश्चयेपि घटीयकर्मत्वमित्यन्वयमतेरनुत्पत्त्या कर्मताधर्मिकघटान्वयबोधपरत्वप्रकारकनिश्चयत्वेनैवतात्पर्यधियस्तस्यां
कारणत्वेनवाक्यार्थस्यतत्रानिवेशात् वस्तुतः समानानुपूर्वीकस्यैववाक्यांतरस्यतत्स्यैवकालांतरमंतरेणापिघटीयकर्मत्वादिपरत्वनिश्चयस्तत्वापिश्रूयमाण
वाक्यव्यक्तेरिदानींतात्पर्यं तत्परत्वस्यानिश्चयेनिश्चयाभावेवा घटीयंकर्मत्वमित्याद्यन्वयमतेरनुत्पादात् [illegible] तत्र तत्त्वव्यक्तिधर्मिकस्यघटकर्मत्वादि
परत्वनिश्चयस्य तदन्वयबोधहेतुत्वमुपेयं तथाच तद्धेतुभूतानांप्रकरणज्ञानाभिधानामेवविद्वान्व्यक्तीनांतथात्वमुचितं अवश्यक्लृप्तपूर्ववर्तिताकत्वात् अतएव २
सैंधवमानयेत्यादावपिलवणपरत्वधीर्नलवणाद्यन्वयबुद्धेर्हेतुः किंतुतदर्जकत्वेनाभिमतंभोजनादिप्रकरणस्यप्रतिसंधानमितिन्यायसिद्धांतः एवंवाक्यार्थप्र
तीतिजनकतया भिप्रेतत्वलक्षणस्यतात्पर्यस्यज्ञानमवश्यं शाब्दसामान्येहेतुस्तस्यसंशयव्यतिरेकनिश्चयेचतदनुत्पादात् तन्निश्चयस्यैवयुगपदनेकार्थोप
स्थितौ एकार्थमात्रान्वयेविनिगमकत्वात् लक्षणायास्तत्रकत्वान्मुख्यार्थबाधस्यसर्वलक्षणाव्यापकत्वात् तथाचतात्पर्यावच्छेदकतयैवसर्वत्रवाक्यार्थसिद्धेः प्रत्य
क्षानुमितिभ्यां भिन्नमनुभवंभावयन्नापिशब्दोगृहीतग्राहित्वेनानुवादकइति प्राभाकरमीमांसकमतमप्यनादेयमित्यास्तांविस्तरः ननुस्वार्थान्वयगोचरोबो

धः साकांक्षैरपिसार्थकैरेवशब्दैः संपादनीयोनतुनिरर्थकैः सतत्रकोसौसार्थकः कतिविधश्चेत्साकांक्षायामाह शब्दांतरमपेक्ष्यैवसार्थकः स्वार्थबोधकृत् प्रकृ
तिः प्रत्ययश्चैवनिपातश्चेतिसत्रिधा यादृशः शब्दः शब्दांतरसहकृतएवस्वस्यस्वघटकस्यवा स्वसमुपस्थाप्ययादृशार्थान्वयबोधंप्रति अनुकूलः सतथाविधा
घ२ र्थेसार्थकः घटपाचकाद्याः प्रकृतयः सुप्तिङाद्याः प्रत्ययाश्चादयोनिपाताश्चस्वोपस्थाप्यस्वार्थस्यबोधंनियमतः शब्दांतरसहकृतएवजनयंति वाक्यानिपुनरस
हकृतान्यपिशशविषाणादिकं शब्दा अपिशशीयत्वादिना विषाणादेरन्वयबोधमादधानस्तादृशविषयिताकबोधनेनसार्थकएव परंत्वयोग्याः सचायंत्रिविधएव प्रकृतिः प्रत्य
योनिपातश्चेति शपूर्वपनादिकरणानुमाद्यागमश्चान्वयबोधनेप्रकृत्यादीनांसहायोपिनस्वार्थोपस्थितिद्वारायेनतमादायचतुरादिविधएवसार्थकः पुत्रोवह्नसादाव
पियुष्मदादिसंबंधोनचभाऽदेशस्यार्थः किंतुतदादेशिनोयुष्मकमित्यादिवाक्यस्यात् पूर्वपदमपेक्ष्यैवतादृशसंबंधबोधानुकूलेतत्रनप्रसंगः सहशाद्यर्थप्रकृ
सर्दिष्योपिनिपुनिष्प नीकाशादिशब्देषु अतिप्रसंगस्तुसमासांतर्गतत्वमियतस्वार्थबोधकताकान्यत्वेनविशेषणाद्वारणीयः तत्रप्रथमोद्दिष्टांप्रकृतिंलक्षयति·
स्वेतरार्थानवच्छिन्नस्वार्थान्वयबोधने यच्छब्दनिर्णयोहेतुः प्रकृतिः सातदर्थिका स्वेतरशब्दार्थाविशेषितस्ययादृशस्वार्थस्यान्वयबोधंप्रतिस्वाव्यवहितोत्तरत्वसं
बंधेनयादृशशब्दवत्तायाः निश्चयएवहेतुस्तादृशशब्दएवतथाविधार्थेप्रकृतिः पच्प्रभृतयोहिशब्दाः स्वोत्तरविभक्त्याद्यंशेनिश्चिताएवस्वोपस्थाप्यस्य...नस्य
धात्वादेरन्वयंप्रत्ययार्थेकर्मत्वकर्तृत्वादौबोधयंति नत्वन्यथा प्रत्ययास्तु पदांतरार्थानवच्छिन्नस्यस्वार्थस्यान्वयबोधंप्रतिअनिश्चितामप्युपयुज्यंते चैत्रः
पचति पचतीत्यादौ शब्दांतरधर्मिकस्यसुबादिनिश्चयस्याभावेपितदर्थकस्यएकत्ववर्तमानत्वादेश्चैत्रपाकादावन्वयात् स्वाव्यवहितोत्तरत्वसंबंधेनयादृश
शब्दवत्तयानिश्चयएवतदुपस्थाप्ययादृशार्थान्वयबोधंप्रतिहेतुस्तादृशस्यैवचशब्दस्यप्रकृतेतथाविधः स्वार्थः स्वपाकेत्यादिशब्द...पिपचनादिरूपः स्तु
पचएव पचनादेः कर्मत्वादावन्वयबोधंप्रति अमादिधर्मिकतादृशशब्दवत्तानिश्चयस्यैवहेतुत्वात् वकुगुडोदकाशीनादीपदसमासत्वादिरूपस्यस्वार्थस्यप्र
क्षादावन्वयबोधंप्रति गुडादिपदधर्मिकस्वान्तरत्वसंबंधेन वकुणादिप्रत्ययस्यनिश्चयस्यैवहेतुरपिनपदार्थांतरानवच्छिन्नस्यतादृशस्वार्थस्यप्रकाशादावन्वय
बोधकः प्रत्ययानांप्रकृत्यर्थावच्छिन्नस्यैवसंख्यादिभिन्नस्यार्थस्यधर्म्यंतरेऽन्वयबोधकत्वमुत्तरत्वेननः प्रागविहितेकृदिकर्तृकरादौनप्रसंगः नवा
चंद्रभिन्नोयंकुंभकारोयंदृष्टोदासदृशः कृश्राद्यर्थके भिन्नकुंभकारादौपूर्वपदार्थावच्छिन्नस्यैव सदृशाद्यर्थस्यबोधकतायास्तत्रसत्त्वात् नचैवमेवकारादेर ना२
न्ययोगार्थेप्रकृतित्वंनस्यात् पार्थएवधनुर्धरइत्यादौ पार्थादिपदार्थविशेषितस्यैव तादृशस्वार्थस्यान्वयबोधंप्रतिहेतुत्वादितिवाच्यं दृष्टत्वात् प्रकृतेस्वा

नरविभक्तिसंज्ञा च सजातीयत्वनियमादेवकारादेरपि सविभक्तिकत्वएवप्रमाणाभावात् येतुमन्यंते पार्थान्वयोगव्यवच्छिन्नव्यवच्छेदस्यैवतत्र एवकारार्थत्वं ताद
श्री.प्र श्यार्थबोधनेतात्पर्यग्राहकत्वेन पादिवदाकांक्षासंपादकत्वेनैव पार्थादिपदस्योपयोगः एवकारादिनिपातप्रकृतिरेव तस्य च लुप्तविभक्तिकत्वेन तादृशविभ
त्यापत्ति एव निश्चय स्य पार्थान्वयोगव्यवच्छिन्नव्यवच्छेदरूपस्वार्थान्वयबोधं प्रति हेतुत्वमिति तेन पार्थपदस्यैवेत्यत्र पार्थैवकारार्थयोर्भेदेनान्वये विभक्तिकस्यान्वय
३ बोधस्यापलापप्रसंगः प्रसंगाच्चैतमोरसि नान्वयस्य वच्छेदस्यैवसादावपि प्रातिपदिकार्थयोरभेदान्वये तत्र स्यन्नाभ्राः समानविभक्तिकस्याप्र
यायादिति यत्तु उपसर्गाणामिवैवकारादिनिपातानामपि न प्रकृतित्वं निरर्थकत्वात् परंतु समभिव्याहृतपार्थादिपदानां तदन्वये भव्यवच्छिन्नत्वा
दिलक्षणार्था निरूढत्वं संपादकतामात्रमिति तन्न तस्मिंस्तु लाघवादन्यथानिर्विभक्तिकस्योपस्थाप्ययदर्थबोधकत्वेन यस्य निश्चयस्तत्वेन हेतुत्वस्य
वाप्रकृतिः स्यात्तदर्थिका तत्वेनयन्निश्चयत्वेन स्वोपस्थाप्ययादृशार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वं स्य संसर्गक यादृशशब्दवत्तानिश्चय
त्वेनहेतुत्वं तादृश एव शब्दस्तत्त्वार्थविधेयार्थे प्रकृतिरिति तु फलितार्थः बकुगुडेद्राक्षेत्यादौ बकुलादिपदार्थस्यान्वयबोधं प्रति न बकुलादिनिश्चय
त्वेनहेतुत्वमपि तु बकुगुडादिपदनिश्चयत्वेनान्यथा केवलादपि बकुगुडादिशब्दात् द्राक्षादौ बकुलार्थस्यान्वयबोधापत्तेरिति न तत्र प्रसंगः प्रसयंल
क्ष्यति विभजते च स्वार्थप्रकृत्यन्ये निपातान्यश्च वृत्तिमान् स तादृशार्थे शब्दः स्यात् प्रत्ययोसौ च तद्विधिः यादृशार्थे इतिवृत्तावप्यन्वेति तेन ३
यादृशार्थकप्रकृतिनिपाताभ्यां भिन्नो यादृशोर्थे शक्तिनिरूढलक्षणान्यतरात्मकप्रशस्तवृत्तिमान् स तादृशशब्दः स तादृशार्थकप्रत्ययः प्रशंसाया
मतुपो विधानात् शक्त्यानिरूढलक्षणया च गुणगुणिनोः स्थितिप्रस्थान्या बोधका अपि शुक्लादिशब्दाः प्रत्ययः प्रकृतिभ्यां भिन्नास्तथा शक्त्यासम
र्थ्यादिप्रतिपादिका अपि चाव्ययोन निपातोप्यः सुबादियस्तु स्वपरतायामेव प्रकृतयोन्त्वेकवाध्यर्थ तृतीयादौ कर्मत्वादि सत्यपि लक्षणा न निरूढा
प्राथमाः प्रयोगविरहात् अत एव यत्रासि प्रयोगस्तत्र तृतीयादितोपि कर्मत्वादेरवगमो यथा पशुना रुद्रं यजतेत्यादौ अत एव बान्वर्थबलादेकवचनादेर
कत्वादिबोधकत्वप्राप्तौ द्विवचने कवचने वकृषु वकुषवर्तमीयत्य पाणिनिः प्राह तदिदं द्वित्वैकत्वादेरेव द्विवचनैकवचनादिनियमार्थमिति फणि
ति

भाष्यकृतः तेन द्वित्वादावपि नैकवचनादिः प्रामाण्यं तद्वित्वाख्यातकृतोपि एतेन व्याख्याताः तत्रापि शक्तिर्वा निरूढलक्षणाया एव प्रत्ययत्वसंपादक
त्वात् नहि भिक्षुकोदाक्षिः पचतीत्यादौ पक्षणादेर्भक्षणादेः शाघ्रगमः कृदादितः कस्यापि स्वार्थकप्रत्यय त्रस्यैव रूपमर्थः तेन लुप्यते भा.
देवतेत्यादौ सनत्वादीनां व्याप्तिर्भावविहितानामपि घञादीनां कर्मवगतिस्तत्रापि भावपदस्य धात्वर्थस्वरूपपरत्वात् अन्यथा पाकः पच्यते इत्यादौ धा
त्वर्थस्य पचनादेः कर्मत्वादावनन्वयापत्तेः सुबर्थधात्वर्थान्वयस्याव्युत्पन्नत्वादिति भेव स्तोकः पाक इत्यादिप्रयोगस्य परिशिष्टस्य प्रामाण्य
अन्यथास्तोकादिनो धात्वर्थविशेषणत्वे नियमतो द्वितीयापत्तेः अत एव सचारो रतिमंदिरावधि सखी कर्णानि धिव्याहृतामितिप्रयोगे काव्यमा
गमेति निष्फलस्तत्र भुक्तिस्तोकापि यत्रतेत्यादिश्च स्तु तिश्च सगच्छते इति नव्याः स्वान्तप्रत्ययार्थसोकाक्षस्यैव धात्वर्थविशेषणता तत्स्यबोधनेत
दर्थकनाम्नो द्वितीयाद्यपेक्षा न तु धातुमात्रस्य तथा च स्तोकः पाक इत्यादिरेव प्रमाणं न तु स्तोकं पाक इत्यादिः अपृथक्रूपक्रियाविशेषणं कर्मत्वाधनहरि
कृरपि तत्रैव तात्पर्यात् एतएव स्तोकं स्थीयते सागतं वर्तितं ग्रामस्य पृष्ठमित्यादौ धात्वर्थस्य तिङर्थकालादिसाकाङ्क्षत्वात्तद्विशेषणस्य द्वितीया
द्यनुपपत्तिरिति शाब्दिकसंप्रदायः यत्तु वाक्यपदीये भर्तृहरिणोक्तं यः स्वेतरस्य यस्यार्थे स्वार्थस्यान्वयबोधने युद्यपेक्षस्तयोः पूर्वा प्रकृतिः प्र
त्ययः परइति तद्गुणादावव्याप्तिप्रसंगादुपेक्षितं यद्यपि स्वेतरार्थानवच्छिन्नस्वार्थस्यान्वयबोधने योसमर्थः स शब्दः प्रत्ययः सोवतुर्वि
धः इत्युमापत्युक्तं स पूतिदोः पदार्थान्तरानवच्छिन्नस्वार्थसंख्यादिप्रकारकबोधसमर्थत्वेन तयोस्तव्यादौ व्याप्तेः शेषइत्यत्र सत्यपादपूरणे पुनः
संधिः लाघवादन्यथा निर्वक्ति इतरार्थानवच्छिन्ने स्वार्थेयो बोधनाक्षमः तिङर्थस्य निपातान्यः स वा प्रत्यय उच्यते यः शब्दः शब्दांतरार्थविशेषि
तेयादृशस्वार्थधर्मिणि तिङर्थस्यान्वयबोधने स्वरूपायोग्यः स वा भिन्नादिशब्देभ्यो भिन्नस्तादृशार्थे प्रत्यय इत्यर्थः चैत्रोसीत्यादौ अर्थांतरा
नवच्छिन्नस्वार्थे नाम्नां तिङर्थान्वयबोधकत्वमतु इति प्रसंगः यत्यादिधातूनां पचतीत्यादौ तिङर्थपाककारीत्यादौ कृतां काश्यपि
त्यादौ तद्धितानां प्रकृत्यर्थावच्छिन्न एव स्वार्थकत्वादौ तिङर्थस्य वर्तमानत्वादेर्बोधकत्वं न तु तदनवच्छिन्न इति न तत्र प्रसंगः निपातनिपातादिकृत्सु
शब्दांतरानवच्छिन्ने सत्यपि समुच्चयादिस्वार्थे तिङर्थस्यान्वयं प्रति स्वरूपायोग्यापि निपातादिरेवेति न तत्र प्रसंगः निपातत्वं लक्ष्यति स्वार्थे शब्दांतरा

श.प्र. र्थस्य तादात्म्येनान्वयाक्षमः सुपाद्यन्यो निपातोऽसौ द्विविधश्चादिभेदतः यः शब्दः केवले यादृशेऽर्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सु
बादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशेऽर्थे निपातः चादयोऽपि निपाताः स्वार्थे समुच्चयादौ नामार्थस्याभेदेनान्वयबोधं प्रत्ययोग्याः नहि स्मृतं मनुष्
४ तं चैत्रादि इति स्मृतः समुच्चयः इत्यादि रनुभवः किंतु स्मृता मनुष्ययोः समुच्चय इत्यादिरेव स्तोकं पचतीत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्य बोध
मत्रासमर्थ एव प्रत्ययस्तु सुबादिरेव स्तोकशब्द इत्यादौ नामार्थस्याभेदसाकांक्षत्वकारणादिवत्परतायां न निपातः किंतु नामैव पुरंदरप्रभृतौ तु न
नाम्नि निपातव्यपदेशः स त्वतिव्याप्तत्वप्रयुक्तो भाक्तः कार्तिक्यादौ यत्र दानं तदसंतविनिंदितमित्यादौ न केवले न अर्थे यदर्थस्य तादात्म्येनान्वयः
किंतु दानाद्यवच्छिन्ने स्वर्दिवानक्तं साध्वव्ययमपि नामैव न तु निपातः शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात् प्रादयस्तु उपस
र्गा न सार्थकाः सार्थकाश्चेन्निपाता अपि जातौ सत्ता नास्तीत्यत्र सत्ताया जातिरन्तित्वस्य समवेतत्वनिरूपितस्वरूपसंबंधेन सत्ताभावे नत्रान्
साध्यते न तु सत्त्वस्याभावः प्रथमान्तपदानुपस्थाप्यत्वेन नञर्थे तत्रास्तित्वादिक्रियान्वयस्यायोगात् अपि जातौ जातिर्न सत्त्व इत्यत्र जातिद्वयस्य
वच्छिन्नाभावस्यैकत्वेन न जातिइत्यर्थस्य द्वित्वस्य पर्याप्तिबाधेनान्वयासंभवाच्च सत्तासमवायेन जातौ नास्तीत्यादौ तु समवेतत्वीयस्वरूपसंबंधा
नवच्छिन्नप्रतियोगिताकत्वे समवायशब्दस्य लक्षणापरेषामपि सत्ताभावस्य समवायावच्छिन्नत्वासंभवेन समवायावच्छिन्नप्रतियोगिताकत्वे
तल्लक्षणायाया आवश्यकत्वात् प्रथमार्थप्रतियोगित्वे समवायावच्छिन्नस्य तत्रान्वयप्रतिसाहसप्रथमायाः प्रतियोगितार्थकत्वस्य क्वचिदप्य
कल्पनात् विशिष्टसत्ता गुणे नास्तीत्यादौ अस्तुप्रयोगो यदि प्रमाणं तदा धेयत्वस्य व्याप्यवृत्तित्वेन प्रत्ययवृत्तित्वावच्छेदेन तस्यां गु
णवृत्तित्वाभावसत्वात् विशिष्टस्यातिरिक्तत्वादिमपि कश्चित् नञो धानचमात्रार्थनञोभानाप्रभागतिः भवति क तपण्यान ४
भक्तानापृक्तो नमे दृष्टादावनेकनञानर्थक्यप्रसंगस्तु न तं विरिंचिर्न भवो न श्रीर्नापि धनाधिपः दातुमर्हति विभवं विश्वेश्वराधनेन
यद्दृष्टादौ विवक्षणात्तरवादिनामपि समानः समानसमाधानं प्रपद्यात्परस्य पुष्पदादौ त्वेवप्रश्नसदृशविधौ चपदशब्दः साकांक्षनिपा
तस्यापि तु पलक्षकत्वेन न तेधनं धान्यमित्यादौ न तस्याप्यनुपपत्तिः सदृशार्थे निपादनिपातत्वम् सादृश्यस्तु प्रागुक्तदिशावसेयः सचा

सचार्थे निपातत्वम् नञ् पुनरिवैव न मास्मादिभेदाद् द्विविधः ननु यदि प्रकृतिः प्रत्ययो निपातो वा स्वार्थस्योपस्थितिद्वारान्वयबोधं कुर्यात् प्रत्येकमात्रं निराकांक्षमेव
सहकृतं वा किं नु कुर्यात् मिलितानामेव तेषां तथात्वं तु सर्वत्रासंभवतीत्यत आह वाक्यभावमवाप्तस्य सार्थकस्यावबोधतः संपद्यते शाब्दबोधो न तन्मात्रस्य बोधतः सा
र्थकस्य प्रकृत्यादेर्वाक्यतामापन्नस्यैव स्वार्थोपस्थितिद्वारान्वयबोधकत्वं न तु प्रत्येकस्य निराकांक्षस्यापि तस्य वा वाक्यत्वादिशब्दसमूहस्य निराकांक्षस्यापि तस्यान्वय
बोधकतापत्तिरतो वाक्यं लक्षयति मिथः साकांक्षशब्दस्य व्यूहो वाक्यं चतुर्विधं सुप्तिङन्तचयो नैवमतिव्याप्त्यादिदूषितः यादृशशब्दानां यादृशार्थविषयिताकबोधं प्रति अ
नुकूला परस्परसाकांक्षा तादृशास्तोमएव तथाविधार्थे वाक्यं तच्चतुर्विधं यतस्तच्चविद्या वक्ष्यन्ते वह्निनासिंचतीत्यादिपिवाक्यमेव परंतु बाधितार्थकत्वादयोग्यशाब्द
मतः शाब्दार्थत्वोपगमे निर्वह्निर्वह्निमान् पचन्नपचतीत्यादिकमपि वाक्यमेव नोच्चेदपार्थकमेव यादृशबोधत्वावच्छेदेनाकांक्षा तादृशानुपूर्वी प्रयुक्तपदानामेव तथाविधार्थ
बोधं प्रत्युपार्थकत्वात् यत्तु सुप्तिङन्तचयो वाक्यमित्यमरसिंहोक्तं तन्न युक्तं सुबन्तादेः प्रत्येकं समुदायविकल्पेनातिव्याप्त्यव्याप्त्योः प्रसंगात् नहि घटपटमित्याकारः पचतिगच्छती
त्यानुपूर्वीको वा शब्दसमूहो वाक्यं न वा घटः पचतीत्येतयोः प्रत्येकं न वाक्यत्वं क्रियारहितं न वाक्यमस्तीत्यादिकं तु प्रायोवादो निर्युक्तिकत्वादश्रद्धेयः प्रकृतिं विभजते निरु
क्तप्रकृतिर्द्विधा नाम धातुप्रभेदतः यदीति पदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते निरुक्ता न तु संख्या नामिव जगदुपादानं भूतानां यच्च पाणिनि प्रातिपदिकं प्रकृतिर
क्तं तदपि नाम्नो नातिरिच्यते नातो विभागन्यूनता तत्र प्रथमोद्दिष्टं नाम लक्षयति येन स्वीयस्यार्थस्य मुख्यत्वतः प्रतिपादने स्वोत्तरप्रथमापेक्ष्यते तन्नाम स्यात् तदर्थकं यादृ
शशब्देन स्वोपस्थाप्य यदर्थमुख्यविशेष्यकान्वयबोधार्थं स्वोत्तरप्रथमाविभक्तिरपेक्ष्यते तादृशशब्द एव तदर्थकं नाम घटादयो हि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थमुख्य
विशेष्यकं बोधमुत्पादयंति न त्वन्यथा नहि घट इत्यादितः द्वितीयादिमन्तादपि घटादिमुख्यविशेष्यकः सुबर्थस्य संख्यादेरवगमः पीतघटे इत्यादिकः स्व समासोऽपि स्वोत्तरप्रथमाप्र
तिसंधानदशायामेव घटादिमुख्यविशेष्यताकस्य पीतादन्वयबोधस्य जनकः अत एव नापदं प्रयुंजीतेति वृद्धाः परं विशिनष्टि पीतपटरूपमित्याद्यवपि नाकांतरवाक्यार्थबोधप
र्यवसायी वाक्यार्थबोधः पीतादिनाम्नः प्रथमान्तत्वाभावेन तदर्थे पीताद्यन्वयाभिधेय पूर्वमसंभवात् विशिष्टवैशिष्ट्यावगाहितायाः प्रमाणान्तरेण पटधर्मिकपीतनिश्चयादपि तत्र
संभवात् न चान्योन्यपरस्परादिनाम स्वव्याप्तिः एषः प्रथमान्तनाभिधीयते इतिवृद्धाः स्मरणादिति वाच्यं मल्लः श्यामल्लो न्यक्षं न्यत इत्यादौ मल्लयोः परस्परकर्तृकहननकर्मत्वान्व
यानुरोधेन तेषामपि प्रथमान्तत्वादन्यथा कर्मकृत्यादित्यनुक्तव्याख्यातसाकांक्षतानुपपत्ते रकर्मकस्यैव धातोस्तथात्वात् निरुक्तं नाम विभजते रूढं योगरूढं चैव योगरूढं च
यौगिकं तत्र चतुर्धापि रूढं यौगिकमन्यते पिकं तन्नामचतुष्टयमकारप्राथम्यं तेन किंचिन्नाम कृत्प्रत्ययरूढमेव यथा गोप्रभृतौ गवादि गमेर्डोः इत्याद्यभावात् घट इत्य
सादृश्यादिकप्रत्ययस्य शक्तिविरहेणायौगिकत्वविरहात् किंचिल्लक्षकमेव यथा तीरादौ गंगादि आधेयतुल्यता पूरवतीरे शक्तिग्रहस्याविशिष्टत्वेऽपि आ

श.प्र. अपनिहत्प्रयोगाग्रहात् तदप्रामाण्यकल्पनात् शक्तेः पूर्वपूर्वप्रयोगानिमित्तत्वात् किंचिद्योगरूढमेव यथा पंकजातपद्मादौ पंकजादि किंचिद्यौगिकमेव यथा पाचक
कर्त्रादौ पाचकादि रूढयौगिकमप्यधिकं नास्ति यथा मंडपो महारजतादि तद्धि कदाचिदवयवव्युत्पत्त्या योगार्थमेव कदाचिच्च समुदायशक्त्या रूढ्यर्थमेवाभिधत्ते ५
५ सप्रयोगमते गौर्वाहीक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणगवादिपदं गोसदृशादौ लाक्षणिकमेव न तु ततोऽतिरिच्यते रूढं नाम लक्ष्यते रूढं संके
तवत्त्वं सैव संकेतिकी र्त्यते नैमित्तिकी पारिभाषिकी औपाधिकी च पितद्विदा यन्नाम यादृच्छार्थसंकेतितमेव ननु यौगिकमपि तत्रतत्र च योगरूढं लुंपक
जादिकं न तथा रूढं नामैव च संज्ञापदेनाभिलक्ष्यते ननु रूढादिवत् संज्ञापि नाम्नो वांतरभेदः येन विभागो व्याघातः स्यात् संज्ञायाश्च तत्र योक्तिदः नैमित्ति
कीपारिभाषिकी औपाधिकी चेति पाचकपाठकादयस्तु न संज्ञा संकेतशून्यत्वादिति वक्ष्यते ये तु रूढस्य नाम्नश्चतुर्विधत्वमाहुस्तन्मतमुपन्यस्यति जा
तिद्रव्यगुणास्वदेर्धर्मैः संकेतवत्तया जातिमद्द्रव्यादिभेदेन चातुर्विध्यं परे जगुः गोगवयादीनां गोत्वादिजातिमत्प्रत्याद्यादीनां कंगलु घनादि द्रव्येण
—यपि शुक्लादीनां गुणयद्वृत्तादिगुणेन चलचपलादीनां शब्दादीनां कर्मणावच्छिन्ने शक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति यदुक्तं दंड्याचार्यैः शब्देरेव
प्रतीयंते जातिद्रव्यगुणक्रियाः चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विध इति तदेतज्जडमूकमूर्खादीनामन्यथासंप्रदायानां च शब्दानामपरिग्रहापत्तापा
दिसूत्रकमस्वामिनैमित्तिकसंज्ञां लक्षयति जात्यवच्छिन्नसंकेतवत्ता नैमित्तिकी मता जातिमात्रे हि संकेतात् व्यक्तेर्भानं सुदुष्करं यन्नाम जात्यवच्छिन्नसं
केतवत् सा नैमित्तिकी संज्ञा यथा गोचैत्रादिः सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वसंकेति
तमित्तो साकाङ्क्षग्रहात् गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुभवानुपपत्तेः एकशक्तत्वग्रहस्यान्यानुभावकत्वेतिप्रसंगात् ननु गामानयेत्यादौ गो
त्वादिकर्मताकत्वेनैवानयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यवयववृत्तिप्रवेशवत् हेतुत्वात् सुबर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसंबंधेने ५
वप्रकृत्यर्थस्य गोत्वादेः साकांक्षत्वात् गोत्वादिकर्मताकत्वेन बोधस्तु अन्यकाले समाक्षेपात् कर्मत्वे गोवृत्तिगोत्वनिष्ठकर्मताव्यादानयने गोवृत्तिकर्मता
कं गोत्ववृत्तिकर्मताकत्वादिलाघवानुमानसाम्राज्यात् न च वस्तुगत्वायकोऽत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तमित्येवं ग्रहादपि शुद्धगो
त्वस्यान्वयबोधापत्तिर्गोत्वत्वावच्छिन्नशक्तत्वप्रकारकज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्र
वेशादिति वाच्यं गोपदं गोत्वशक्तमित्याकारकज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयता संबंधेन शक्तत्वविशेषणत्वेन गोत्वत्वादि

प्रवेशे गौरवस्यायोगात् न हि समवायान्यसंबंधेन जातेः प्रकारतायां धर्मावच्छिन्नत्वनियमे मानाभावात् अयं गौरित्यादि व्यवसायोत्तरमिमं गोत्वेन जा
नामीत्याकारतस्य ज्ञानतालिंगकानुमानेनुव्यवसायेव्यभिचाराच्च प्रागनुपस्थितस्य गोत्वत्वादेस्तत्रोपनयायोगात् एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य सम
वायाद्यवच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्यतावच्छेदकविषयतया सुबर्थकर्मताद्यंशे च परंपरया प्रकारत्वायोगादसंप्रयुक्तं उक्तस्थल एव व्यभिचारात्
न चैवं काले गौः पदं गौरित्यादिप्रत्ययोपि प्रमा स्यात् कालिकाकालिकसंबंधेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसंबंधेन गोत्वादेः प्रामाण्यस्य
गोत्वत्वावच्छिन्नप्रकारतागर्भत्वेन तादृशमते प्रमात्वायोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगेन घटे घटत्वादिप्रतीतेः समवायेन प्रमा
त्वस्य दुर्वारत्वापत्तेः शाब्दस्यैव प्रत्यक्षस्यापि काले गौरित्यस्य नियमतो गवाद्यभेदाद्गवादित्वेनैवाप्रमात्वसंभवादिति भट्टमतानुवर्तिनः तन्मते विना
व्याक्षेपं गामानयेत्यादितो गवादिकर्मत्वेनानयनादेरन्वयबोधस्यानुभाविकत्वात् गौर्गच्छतीत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्याननुभवेनासंस्पर्शात् गोत्वा
द्यनुपस्थितेश्च गोत्वं गच्छतीत्यनुभवस्यासंभवात् स्वाश्रयवृत्तित्वसंबंधेन गतिमत्त्वादिहेतुना गवादेः साक्षात्संबंधेन गतिमत्त्वाद्यावसायस्य व्यभिचारादिदोषेण
दुःशक्यत्वाच्च एतेन कर्मत्वादौ गोत्वादेः स्वाश्रयवृत्तित्वसंबंधेनान्वयबोधोपगमे कर्मत्वस्य गोत्ववृत्तित्वं गोवृत्तित्वं विनानुपपन्नमिति तदुपपत्तिधीसहकृतेन गामित्या
दिवाक्येनैव कर्मत्वान्वयमित्यापादिष्यते लौकिको गवादिव्यक्तिबोध इति श्रीकरमतमप्यनादेयं मिथोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यां अवच्छिन्नबोधस्यैकी
कृतेन च तदनुपपत्तिभ्यां संगृह्यते तथाविधोपादानकबोधस्य जननायोगाच्च यत्तु गौर्जायते गौर्नश्यतीत्यादौ सर्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षण
या गोत्वादिविशिष्टव्यक्तिर्बोध्यते व्यक्तिं विना कुत्रचिदनान्वयलक्षणत्वेन च तत्र ध्वन्येकदेशस्य नाशोत्पत्त्यनुपपत्तेरपि लक्षणाया बीजत्वात् यदाहुर्मंडनाचार्याः जातेरस्ति
त्वनास्तित्वे न हि कश्चिद्विवक्षति नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे इति तत्तुच्छं व्यक्तिं विना कृतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तत्र
त्वस्य शक्यत्वे तत्र गवादौ लक्षणायाः वक्तुमशक्यत्वात् शक्यसंबंधस्यैव लक्षणात्वात् न च गौरन्यो महिष इत्यादौ पंचम्यर्थे ऽवधित्वे प्रतियोगित्वे वा स्वावच्छि
न्नसंबंधेन शुद्धस्य गोत्वादेरन्वयः तथाविधस्थल एव जातौ मुख्यप्रयोगः तत्र पंचम्याः स्वार्थेवधित्वादौ स्वनिष्ठगोत्वावच्छेदकत्वसंसर्गेण प्रकृत्यर्थस्य गोत्वादे
रन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भक्तिशक्तिभ्यां गोपदेन बोधने वृत्तिद्वययौगपद्यापत्तेः शुद्धस्य गोत्वादेः शाब्दधीप्रकारतायां समवायेन

श॰प्र॰ च्छिन्ननियमात् तस्मादभिलापे स्वावच्छेदकसंबंधेनान्वयो दुर्घट एव द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमानुरोधात् घटत्वादेर्जातेर्नानात्वोपगमादिति प्राचाक्तरास्तु
गोत्वशक्तत्वेन ज्ञातं पदं ताद्रूप्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतो गोत्वशक्तिग्रहान्न गोत्वेन गवयादेर्वा द्रव्यत्वादिना गोरन्वयधिया इति प्रसंगः नचैवं जातेरिव व्यक्ते
रपि शक्यत्वमावश्यकं नहि गवादिपदस्य शक्यं तज्जन्यस्मृतिं तु जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरप्यविशिष्टमिति वाच्यं गवादिपदधर्मिकस्वशक्तताज्ञा
६ नत्वावच्छिन्नशाब्दधीजनकतावच्छेदकत्वेन गोत्वादिजातेरिव मत्वादिपदशक्यत्वात् गोत्वशक्तत्वापेक्षया गोशक्तत्वस्य गुरुतया तत्तद्ज्ञानत्वस्य गोशाब्दप्रतिजन
कतानवच्छेदकत्वात् अत एवान्वयबुद्धौ तात्पर्यालाभावगाहित्वेपि न तेषां पदशक्यत्वं अस्तु वा गोत्वादिशक्तत्वेन ज्ञातं पदं गोत्वादिशाब्दत्वावच्छिन्नं प्रत्येव हेतु
र्विशेष्यतया तादृशशाब्दबोधं प्रति समवायेन गोत्वस्य नियामकत्वकल्पनाच्च नातिप्रसंगः गोत्वादीनां गवादेरिव गवादेर्गोत्वादिना, न्वयबोधत्वावच्छिन्नं प्रत्यपि विनि
गमकाभावेन गोत्वादिशक्तिज्ञानत्वेन हेतुतामपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च क्रमो कारणतायामिव लाघवात् वस्तुतो गोत्वशाब्दबोधं प्रति गो
त्वशक्तिज्ञानमेव हेतुर्न तु गोत्वमपि जातिव्यक्त्योरतुल्यवित्तिवेद्यत्वनियमादेव गोव्यक्तीनां तद्विषयत्वासिद्धेः प्रमाणविरहादेव गोत्वादिना गवयादिविषयत्वस्य तत्रासिद्धेश्च
यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषयतानिरूपितत्वमिति नव्याः गोत्वाद्यालोचने काले गोत्ववान् इत्यादिबोधे व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारतायां त
त्राहनियमः गोरस्मि इत्यादिज्ञानस्य प्रत्यक्षे गोत्वेन इत्संज्ञानामीमांसाकारे तथात्वे तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादिप्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति प्रादिः
तादृशविशेष्यताकत्वं विना शुद्धस्य गोत्वादेरन्वयबोधेनास्पर्शात् गुरूणां गोत्वेन गवयादिबोधस्यालीकत्वात् अत एव गवाद्यंशे गोत्वादिप्रकारकबोधः समवायेन
वसंबंधांतरेणापि तत्प्रकारकः स्यात् गोत्वशक्तिज्ञानस्य तदीयसंबंधज्ञानं प्रत्युदासीनत्वादिति सर्पिप्रसक्तौ शाब्दमते शुद्धगोत्वप्रकारतायां गोविशेष्यताकत्वस्यैव समवाया
वच्छिन्नतस्यापि व्याप्तिबलेनासिद्धावपि संबंधांतरावच्छिन्नत्वस्य प्रमाणविरहेणासिद्धेः एवं च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतावच्छेदकता गोत्वादेरेव गवादि ६
पदस्य गौर्गवादेः तद्व्यवहारस्तु तादृशावच्छेदकधर्मवत्त्वमेवमुक्तो गौणः नचैवं गम्यादिधातोरपि गोत्वादेः शक्तिर्न स्यात् गतित्वादिशक्तित्वादिव ताद्रूप्य
णा गम्यादेर्गत्यादितो बोधसंभवादिति वाच्यं गुरुत्वात् गतित्वादेः संस्थानाव्यंग्यत्वेन जातित्वासंभवात् संयोगाद्यवच्छिन्नक्रियात्वाद्युपाधिरूपे च तत्र ते त
रूपतः शक्तिग्रहायोगात् सरत्वं इत्यनिरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वाद्यवच्छिन्नशक्तता ज्ञानत्वेन हेतुत्वमपेक्ष्य लघुतया नानाधशक्ति
यात्वावच्छिन्ने शक्तिमत्ता ज्ञानत्वेनैव तथा हेतुत्वौचित्यात् गुरुत्वादिप्रयोज्यपतनत्वादेरखंडत्वेपि पत्तादिधातोस्तत्र शक्तत्वेपि क्षतत्वाभावाच्च पत्तादिपद

नामपि लोमवत्त्वं गलकंबलादिपर्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्र दृष्टत्वादिग्रहो न तु तन्मात्रस्यानुभवेन तदाश्रयस्य लाभात् लोमादीनां स्वाश्रयतुल्यवित्तिवे
द्यत्वस्य लोमकंबलवान् देश इत्यनुभवे व्यभिचारादिति प्राहुः तत्र ब्रूमः शाब्दमते गवादिव्यक्त्यवगाहित्वमवश्यं कारणप्रयोज्यं जन्यधीविषयतायास्त
त्प्रयोज्यत्वनियमादन्यथा पक्षधर्मिकसाध्यावगाहित्वादेरपि परामर्शात्प्रयोज्यत्वं न स्यात् अनुमित्यादिसामान्यं प्रत्येव ज्ञानत्वादिना हेतुत्वस्य लाघवेनोचि
तत्वात् पक्षतादिसहकृतेन परामर्शाद्युत्तरज्ञानस्य तत्प्रकारकत्वस्यैव वा पक्षे साध्यावगाहित्वनियमादेवानुमित्यादेः प्रतिनियतपक्षाद्यवगाहित्वसिद्धेः किंच गोत्वरात्
त्वं न गोत्वसमर्थत्वं यस्य धीरन्वयधीहेतुरप्रसिद्धत्वात् नापि तत्कोचरमभिधानामकं पदार्थांतरमानाभावात् न वा गोत्वानुभवजनकत्वं पटादिपदस्या
पि गोत्वशक्तत्वापत्तेः तस्यापि गवादिपदार्थ[?] सान्निध्येन गोत्वानुभवजनकत्वात् न च गोत्वानुभवसामान्यं प्रति हेतुत्वं तथा गवादिपदेप्यसत्त्वात् नापि गो
त्वानुभवजनकत्वप्रकारकनिरसंकेतवत्त्वं तादृशसंकेतमात्रं वा गोत्वशक्तत्वमिति सांप्रतं गोपदं गोत्वेन गवानुभवस्य जनकं इति संकेतितमित्यादिग्रहेपि तस्य
ग्रहात् गोत्वेन गोरन्वयधीप्रसंगात् किंतु गोत्वेन गवानुभवस्य जनकत्वात् संकेतितत्वं स्यात् तथा च पदधर्मिकज्ञानत्वेन गोत्वप्रकारकशाब्दप्रतिहेतुतायां गोत्वस्ये
वतद्विशिष्टस्य गोरपि विषयविधयावच्छेदकत्वात् अवश्यं गोत्वादिविशिष्टगवादिर्गवादिपदस्यार्थः स्यादिति निरुक्तस्यैव संकेतस्य कुतः प्रथमतो ग्रहः नोप
मानान्वयाकरणाभकोशान्नविवरणान्तप्रसिद्धार्थसामानाधिकरण्यान्नापि वाक्यशेषात् दमीषां शक्तिग्रहमूलकत्वेन पूर्वं पृथक्कस्यापि तत्सवादात् आह
संकेतस्य ग्रहः पूर्ववृद्धस्य व्यवहारतः पश्चाद्वोपमानाद्यैः शक्तिधीपूर्वकैरसौ प्रथमं पदेषु संकेतग्रहो वृद्धस्य व्युत्पन्नस्य शब्दाधीनव्यवहाराद्बालानां त
थाहि गामानयेति केनचिन्निपुणेन नियुक्तः कश्चन व्युत्पन्नस्तच्छ्रवणतोऽर्थं प्रतीत्य गवानयनं करोति तच्च उपलभ्यमानो बालः इदं गवानयनं स्वगोचरप्रवृत्ति
जन्यं चेष्टात्वात् मदीयस्तनपानादिवत् इत्यनुमीय तां गवानयनप्रवृत्तिं स्वविषयधर्मिककार्यताज्ञानजन्या प्रवृत्तित्वात् निजप्रवृत्तिवत् इति प्रवृत्तेर्गवानय
नधर्मिककार्यताज्ञानजन्यत्वं प्रसाध्य गवानयनगोचरं तज्ज्ञानमसाधारणहेतुककार्यत्वात् घटवदित्येवमनुमिन्वानः समुपस्थितत्वाल्लाघवाच्च श्रुतं तद्वा
वाक्यमेव तदसाधारणकारणत्वेनावधारयति तदनंतरं च गवादिपदानां प्रत्येकमावापोद्वापेन गवादिबुद्धिजनकत्वमवगत्यानतिप्रसक्तये गवादिसंकेतस्य त
दनुकूलत्वं कल्पयति पश्चात्तु क्वचिदुपमानाच्छक्तिग्रहो यथा गवादिपदशक्तिधीसाचिव्येन स गोसादृश्यातिदेशवाक्यात् गवयपदवाच्यत्वबोधोऽनंतरं गवयप

श. ग्र. जात्यवच्छिन्ने गोत्वादश्यग्रहाद्वयोगान्वयपदवाच्य इत्याकारः क्वचिद्व्याकरणाद्यथा कर्मणि द्वितीया कर्तरि परस्मैपदमित्याद्यनुशासनात् कर्मत्वादेर्द्वि
तीयादेः क्वचित्कोशादपि यथा गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति सीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जडः चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ
८ भृशमाकुले इत्यादिकोशेभ्यः शैत्यादौ शुक्लादिशब्दस्य क्वचिद्विवरणादपि यथा पचति पाकं करोतीति तु स्वार्थकत्वात् कृत्यादेः तिङादेः क्वचित्प्रसिद्धार्थ
शब्दसामानाधिकरण्यादपि यथा नीरूपस्पर्शवान् वायुर्निस्पर्शमात्मनि मन इत्यादौ रूपशून्यस्पर्शवद्द्रव्यादिषु वाय्वादिपदस्य वायुत्वादिजातेरती
न्द्रियत्वेन स्वरूपतस्तदवच्छिन्नस्यानुपस्थिता तत्र शक्तिग्रहायोगात् यथा वा सत्कृत्यालंकृतां कन्यादानः कूकुदः स्मृत इत्याद्युक्तरीत्या कन्यादा
तादिपदस्य कूकुदादिपदस्य सहकारतरौ मधुरं रौतीति पिक इत्यादिकं तु न युक्तं उक्तक्रमेण शक्तिग्रहस्योपपादनरूपं तिङर्थधर्मिप्रयोगभेदेन नामार्थो
न्वयस्याव्युत्पन्नत्वात् प्रसक्षासिद्धः कोकिलत्वजात्यवच्छिन्न एव लाघवेन पिकपदशक्त्यवच्छेदाच्च क्वचिद्वाक्यशेषादपि यथा यवपदस्य कंगुप्रभृतौ
म्लेच्छानां दीर्घशूके च शिष्टानां च व्यवहारात्तेनैकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्यान्याय्यत्वात् यवमयश्चरुर्भवतीति श्रुतौ यवपदस्या
र्थसंदेहे वसन्ते सर्वसस्यानां जायते पत्रशातनं मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः इति विध्यपेक्षितवाक्यशेषात् प्रवर्तमानाद्वाक्यशेषाद्दीर्घ
शूक एव यवपदस्य शक्तिग्रहः यथा वा स्वाराज्यकामोऽग्निष्टोमेन यजेतेत्यादिविधिशेषीभूते यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरं अभिलाषोप
नीतं यत्तत्सुखं स्वःपदास्पदं इत्यादिवाक्येभ्यः स्वरादिपदस्य नेनु व्यवहाराद्यनुमिते गवाद्यानयनधर्मिककार्यतान्वयज्ञाने पदानां प्रथमतः कारण
त्वं साकांक्षपदत्वावच्छेदेन गृहीतमुपस्थितत्वात् तत्तदुपपत्तये शाब्दसामान्यं प्रति अवश्यं कार्यतावाचिपदस्य तत्साकांक्षपदस्य वा हेतुत्वमुपेतव्यं त
था च कथं वाक्यशेषादितः शक्तिग्रहस्य विध्यपेक्षितत्वेनार्थवादतया शाब्दबोधाजनकत्वात् इति प्रभाकरशंकां निरस्यति कार्यत्वस्यान्वयज्ञाने
प्रागगृहीतापि हेतुता पदानामर्थवादेभ्यः पश्चाद्बोधादपेक्ष्यते साकांक्षपदत्वावच्छेदेन कार्यतार्थीजनकत्वं पूर्वं गृहीतमपि उत्तरकाले अर्थवादेभ्यः शा ८
ब्दबोधानुरोधादुपेक्ष्यते पूर्वगृहीतस्यापरिहार्यत्वानियमात् प्रतिविवित्तवस्तुनि व्यभिचारात् न चोपस्थितधर्मावच्छेदेनैव जनकत्वस्य परिग्रह

नियमः पटजनकं दंड्यंद्रव्यमित्यादौ तत्समानाधिकरण्येनापि ग्रहात् अन्यथान्यथाख्यात्यापत्तेस्तत्रैव दुर्वारत्वापत्तेः नन्वकार्यतासाकांक्षपदांतर्भावेऽपि वश
ब्दानामन्वयानुभवहेतुत्वस्य क्लृप्तत्वात् अर्थवादस्थलेन शाब्दधीः परं तु असंसर्गाग्रहमात्रं साकांक्षान्तरकल्पने गौरवादिति वाच्यं कार्यतानिराकांक्षपदांतर्भा
वेऽपि शाब्दधीहेतुत्वस्य कल्पनया विधिस्थलेन शाब्दधीरित्यस्यापि सुवचत्वात् उभयत्रापि अन्वयमतेऽनुभाविकत्वे न कोशेषस्य दुष्करत्वादिति दिक् पारि
भाषिकी औपाधिकी च संज्ञा क्रमेण लक्षयति अन्यथावृत्तिधर्मावच्छिन्नसंज्ञास्यात्पारिभाषिकी औपाधिकी त्वनुगतोपाधितया प्रवर्तते उभयावृत्तिधर्मावच्छिन्नसं
केतवती संज्ञा पारिभाषिकी यथाकाशादिस्थादि साहित्यतया वर्तिनैव शब्दादिनारूपेयात तदाश्रयमभिधत्ते नचाकाशादिपदस्य गगनादेर्निरवच्छिन्नैव शक्तिः
(परंतु परत्वाद्युपलक्षितव्यक्तिष्वेवेति शिरोमण्युक्तमपि प्रयुक्तं) पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे शक्तमपि पटपदं न पटत्वावच्छिन्नं यथाक्रम
दित्यादिग्रहे चेरं ततः पटत्वादिविशिष्टस्यानुभवादवश्यं तच्छक्तिस्तदवच्छिन्नेति चेत् शब्दवति शक्तमप्याकाशपदं न शब्दवत्त्वावच्छिन्ने शक्तिमदित्येवं ग्रहदशा
यामाकाशादिपदान्न शब्दवत्त्वेन गगनस्य प्रतीतिरतस्तस्य शब्दवत्त्वावच्छिन्नैव शक्तिरिति विभाव्यतां एतेन पटत्वाद्युपलक्षिते धर्मिण्येव शक्तिग्रहस्य तादृ
शपटानुभवे प्रतिहेतुत्वात् अस्तु पटादिपदस्यापि पटत्वावच्छिन्नैव शक्तिः परंतु परत्वाद्युपलक्षितव्यक्तिष्वेवेति शिरोमण्युक्तमपि प्रयुक्तं शब्दोपस्थिते धर्मिणि शक्तिग्रहाद्वाकाशादिपदा
त् तदंशे निर्विकल्पकत्वात्स्मरणमन्वयानुभवश्च संघटत इति नानुभविकं न्यायैकान्तिकं वा सत्त्वगतोपाध्यवच्छिन्नसंकेतवती संज्ञा सा औपाधिकी यथा भूतकृतादिः सा हि चेत
नादिनि विशेषगुणवत्त्वादिरूपकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्तते शब्दादिस्तु सखण्डत्वेनोपाधिरूपेनानुगतो द्वित्याद्वृत्तित्वात् अतः पारिभाषिके गगनादिपदेनाति
व्याप्तिः घटत्वादेः संख्यानवृत्तित्वमते यदि घटादिपदं विलक्षणसंस्थानवत्त्वेन शक्यं तदौपाधिकमेव यदि च परंपरया वैलक्षण्यवत्त्वेन तदा नैमित्तिकमेव वस्तुतः सामान्यशब्द
वृत्ते स्वरूपतः प्रकारत्वं समवायेनैवेत्यभिहितं प्रागिति यत्तु जात्यवच्छिन्नसंकेतवतामपि चैत्रादिपदानां पारिभाषिकत्वमाह तेषां मतेन त्रैविध्यमन्यथा निर्वक्ति महामुनि
कसंकेतशक्तिः स्यात्पारिभाषिकं जात्याने मिनितकं शक्तमौपाधिकमुपाधिना यत्रार्थे यन्नाम आधुनिकसंकेतवत्तत्र पारिभाषिकं यथा पित्रादिभिः पुत्रादेः संकेतितं चैत्रा
दिः यथा शास्त्रकृद्भिः सिध्यभावादि पक्षतादि जात्यवच्छिन्नशक्तिमन्नाम नैमित्तिकं यथा गोगवयादि यदुपाध्यवच्छिन्नशक्तिमन्नाम तदौपाधिकं यथाकाशप
चादि आधुनिकस्तु संकेतो न शक्तिर्निरूप्यस्यैव तस्य तथात्वात् तदुक्तं हरिणा आजानिकश्चाधुनिकः संकेतो द्विविधो मतः नित्य आजानिकस्तत्र या श

श.प्र. त्कि रितिगीयते कादाचित्कस्तु आधुनिकः शास्त्रकारादिभिः कृत इति न च पित्रादिनाम संकेतितेचैत्रादिपदे निरूसंकेतत्वे मानमस्ति द्वादशेह्नि पिता नाम कुर्यादिति श्रुतेः पि-
तृकर्तृकसंकेतविधायकमात्रत्वात् चैत्रादिपदस्य शक्तिमत्त्वे पूर्वं पूर्वप्रयुक्तत्वापाताच्च तस्य तन्नियतत्वादिसुकरत्वात् चैत्रादिपदानामिव पारसीकादिशब्दानां संकेतवत्त्वाद्वि
८ शेषेपि न तेषां कर्मकर्म साधुप्रयोगः साधुभिर्भाषितव्यं नापभाषितवै म्लेच्छितवा इति श्रुत्या तत्र तन्निषेधात् म्लेच्छितवै म्लेच्छमात्रसंकेतितैः खरादिशब्दास्तु रासभा
दौ म्लेच्छैरिवार्यैरपि संकेतिताः ननु गवादिपदं गोत्वादिनैव संस्थान प्रभेदेनापि विशिष्टएव गवादौ शक्तमिति तौ नापितदौपाधिकं स्यात् न स्यात् शक्यतावच्छेदकेपि गोत्वाद्यपे
क्षया गुरुत्वेन संस्थानस्य गवादिपदशक्यतानवच्छेदकत्वात् न च संस्थानमशक्यमशक्यमेव गवादिपदस्येति दर्शनीयं गवादिपदप्रयोगादिनामेव सामान्यादि लक्षणाविलक्षणा
कृ सामि नियमो गवादिस्वभावेन तस्या अभिलक्ष्यत्वात् तथा च न्यायसूत्रं जात्याकृतिव्यक्तयस्तु पदार्थ इति पदार्थो गवादिपदस्यार्थः त्रिष्वेकशक्तेर्नानार्थमेकवचनं अ
न्यथाविशिष्टशक्तेर्विशकलितानामिव तेषामनुभवस्य गौर्नित्या गुणे वि साद्दे लक्षणाद्युभावस्य च प्रसंगादिति संप्रदायिकाः नव्यास्तु जातिव्यक्त्योरेक शक्तिप्राधान्यार्थमेव
सौत्रमेकवचनं आकृतिरूपं तु संस्थानं पदार्थे वाक्ये च एकपदोपस्थाप्ययोराकृतिव्यक्त्योरभेदेनान्वयबोधनं गवादिशब्देन कुसन्निवेशित्वादतएव संस्थानानुपस्थितौ केवलेगो
त्वादिप्रकारेणापि व्यक्तेरवगमः शान्त्यैव संपद्यते यदेवं संस्थानव्यक्त्योरिदं केवलं गोत्वादिजात्यैव शक्यतावच्छेदकत्वं च युक्तं पदार्थविधेयवाक्यार्थ वाक्यार्थविधयाभा
सत एव भिन्नं स्यात् नस्यात्समवायेन गोत्वादिप्रदेशपरंपरयासंस्थानवतः परम्परया गुरुत्वेनाशक्यत्वात् शक्यतायाः किंचिद्धर्मावच्छेदनियमनश्रुत्या गोत्वादौ तद्योगा
स्त्रैतिजातुः स्त्रियो वैशिष्ट्यविधुः शोभाचन्द्रसूर्यत्वायाममवच्छिन्नैक शक्तिमतः पुष्पवंतपदस्येव गोत्वसंस्थानप्रभेदयोः अवच्छिन्नैक शक्तिमतो गवादिपदस्यापि जातिस
वच्छिन्न शक्तिमत्तया नैमित्तिकसंज्ञात्वेपि नोपाधिक संज्ञात्वं सखंडोपाधिमात्रावच्छिन्न शक्तिमत एव नाम्नस्तथात्वादिति वस्तुगतिः सौत्रमाकृतिपदं न संस्थानपरं परंतु
करणमुक्तं कारनिरूपकार्थकं जातिव्यक्त्योः संसर्गपरएव अन्यथा समवायादेरपि संबंधविधया गवादिपदशक्यत्वेन तदनुक्त्या मुनेर्न्यूनतापत्तेः क्वचित् ८
तु जातिसंस्थानाश्रयो गवादेरवगमो गवादिपदस्य जात्याकृतिविशिष्टे शक्तित्रिमेयालक्षणया वा संपाद्य इति पुनर्व्याकरणस्य दूषण करण्यं लक्षकं नाम कं
भवति यादृशार्थस्य संबंधवति धर्मकृत्यप्रवेशे तत्र तल्लक्षकं नाम तच्छक्ति विधुरं यदि यादृशार्थस्य संबंधवति यन्नाम संकेतितं तदेव तादृशार्थे लक्षकं यदि तादृशा
र्थे शक्तिर्न स्यात् न भवेत् सैंधवादिशब्दास्तु रागादिसंबंधिनि लवणादाविव तुरंगादावपि शक्ता एव गंगादयस्तु तीरादावसंकेतिता न तत्संबंधिनी यादि शक्ता न गृहीता
एव तीराद्यन्वयं बोधयंति तत्र ते लक्षका एव शक्तत्वे पूर्वप्रयुक्ततापत्तेस्तस्य व्याप्यत्वात् कथंचित्तीरादिसंबंधित्वेन गृहीतादपि गंगादिपदात् तीरादेरन्वयबो-

धेन तीरादयसक्तत्वेसति तत्संबंधिता मात्रं न लक्षणा गंगायां घोष इत्यादावपि गंगा गंगादिभागस्य निरूढलक्षणायाः सत्वेन वैयर्थ्याभावप्रसंगाच्च एतेन तीराद्यसक्तत्वे
सति तीरादिपदवत् तीरादिसंबंध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रयुक्तं अयं शक्यापि लक्षकत्वापाताच्च न चेष्टापत्तिः शक्तिलक्षणान्यतरघटितत्वे तस्य साधुतापत्तेः
पदसाधुतायां शक्तिमत्त्वस्यैव तत्रत्वात् किंचानुभावकत्वं यदनुभावकस्योपधायकत्वं तदपि घोषादिपदत्वाकांक्षस्य गंगापदस्य तीरलक्षकतानस्यात् तेन संबंधितेन तीर
स्यानुभवानर्जनात् स्वरूपयोग्यत्वं तु गंगायामितिवाक्यस्यापि दुर्वारं तस्याप्यधेयतायामपि कनीरानुभवं प्रति निरर्थकनामोत्तरसप्तमीत्वेन तथात्वात् तीराद्येपलक्षणा
चे तीरसंबंधित्वानपायात् ननु वाक्यमपि तत्प्रकं पदस्येव कथमन्यथा चित्रगुरुसमुदायस्य लक्षणया चित्रगोस्वामिनां बोधः कथं वा गंभीरायां नद्यां घोष इत्यादौ गं
भीरनदीतीरस्य नहि तत्र नदीपदं तीरलक्षकं गभीरायामित्यस्यानन्वयापत्तेः नहि तीरं गंभीरं नापि गभीरपदं तथा नद्यामित्यस्याप्ययोग्यतापत्तेः नहि तीरं
नदीति तस्मात् वाक्यमेव तत्र गभीरनदीतीरलक्षकं इति मीमांसकाः तन्न गभीरायां नद्यामिति विभक्त्यर्थभागस्य तादृक् तीरलक्षकत्वे घोषादावाधेयत्वेन तदन्वयानुपपत्तेः
समासादन्यत्र नामार्थस्याभेदे नान्वयस्याव्युत्पन्नत्वात् एतेन तादृशतीरघटितायामेव तद्भागस्य लक्षणायां न निस्तारः तादृशतीरवत्तेऽप्यलक्ष्यत्वे घोषादावभेदेन
तदन्वयायोगः समासभिन्नस्थले नामार्थयोरभेदान्वये नम्लोः समानविभक्तिकत्वस्य तंत्रत्वात् न च गभीरायां नदीभागस्यैव तादृक् तीरलक्षकत्वं तदर्थे विशेषणे
नस्यानन्वयापत्तेः नहि सभागःप्रकृतिः येन तदर्थे विभक्त्यर्थस्यान्वयः स्यात् गभीरायां नद्यां इत्यादि तोपि गभीरनदीतीरकमेव तात्पर्यादिबोधापत्तेः तद्भागस्य वा
स्वादन्यत्वाच्च तस्मात् गभीरपदं नदीपदं वा गभीरनदीतीरलक्षकं पदांतरं तु तात्पर्यग्राहकमिति सिद्धांतविदः यत्तु राधानुकरणस्य कुंफ टादिलोमस्य वस्त्वानुभाविकत्वं अ
पल्लिरागनामिव शक्तिभ्रमादेवस्यादेतत् मुखं विकसितं स्मितमित्यत्र विकसितपदेन विकसितार्थलक्षणया मुखस्य प्रफुल्लत्वमनुभाव्योत्तरकाले कुसुमतुल्यत्वे
रूपमादिमत्त्वं तस्य लक्षणाफलं व्यंजनया तु साबोध्यते इतिरूपादिव्यंजनमपि पूर्वांतरमास्कंद्य नहि तत्र विकसितादिपदं कुसुमस्य शरुपमसंकेतितत्वात् नापि यो
गिकस्वावयवत्वसा तत्प्रतिपादकत्वात् न वा लक्षकं उपस्थितार्थान्वयानुपपत्तिधीरूपस्य लक्षणाबीजस्य तत्रासत्त्वादिति आलंकारिकाः तन्न वदंति दैत्रअन्वयानुपपत्तेर्लक्षणाबी
जत्वे न तत्र कुम्भकं हं शक्यसंबंधातिकायां लक्षणाया तत्प्रदजन्यत्वात् नापि तद्रूपकत्वं मुख्यार्थे मन्वयानुपपत्तिज्ञानमंत रेणापि तद्रूपस्य संभवात् अतएव न लक्ष्यार्थतात्पर्यग्राहकत्वे
प्रकरणादिनापि लक्ष्यार्थपरा ग्रहात् न च लक्षणाजन्यशाब्दबोधं प्रति तस्याः कारणत्वमेव लक्षणाबीजत्वमिति सांप्रतं यष्टीः प्रवेशयेत्यादौ व्यभिचारात् तद्दशायां तु तस्याः
प्रमाणाभावात् अथास्मि नानार्थशब्दे प्रकरणादि साचिव्यादेकविधांतामर्थानामन्वयबुद्धेरनंतरमप्यन्यविधानामन्वयानुभवः सहृदयस्यस्यपर्यायं गौरवितोम

शा.प्र.
८

ह्यनित्याद्यौ यथा वा वयस्कानां गगनास्मेगाद्गानां हृति वेदनाभिहत्यादौ सचायं अनुभवेन शक्तिधीप्रभव: शक्यार्थबुद्धेतस्य संग्रहस्यतत्फलाहकप्रकरणाद्यवगमस्यवाहेतु
त्वेनतदसत्वात् नाखिलक्षणाप्रयुक्त: शक्यार्थे तदयोगात् किंत्वभिधामूलव्यंजनयैव संपाद्यते तदुक्तं अनेकार्थस्य शब्दस्य प्रस्तावाद्यैर्नियंत्रिते एकार्थे अभि
धामूलव्यंजनान्यस्य बोधिकेतिचेन्न तात्पर्यधियो हेतुत्वस्य पूर्वपरास्तत्वात् अतएव प्रकरणादीनामननुगतानां क्वचिदसत्वेपि तत्सम्भवात् वस्तुत: शक्त्युपस्थिता
नामेकविधानामन्वयमतेरनंतरं यथा नविधान्वयबोधस्यात् स्यादपि तदन्वयबोधेन व्यंजनास्वीकारो न चैवं तत्तदर्थ [illegible] सामान्यं प्रसेव तत्तदर्थनिस्तात्पर्यक
त्वधिय: प्रतिबंधकत्वात् तत्तदर्थानां यथाकथंचित् उपनयवशेन मनसैव विशिष्टधीसंभवात् मानोरथिकसुखप्रभेदपर्यवसितं चमत्कारं प्रसूपिशाब्दस्ये
वमानसस्यापि बोधविशेषस्य हेतुतया सुवचत्वात् व्यंजनाख्यपदार्थांतरस्य स्वरूपसत्तयान्वयबुद्धौ तद्धेतुकत्वस्य च प्रमाणविरहेणासत्वात् इति संक्षेप: लक्षणा
मविभजते जहत्स्वार्थाऽजहत्स्वार्था निरूढाधुनिकादिका: लक्षणाविविधास्ताभिर्लक्ष्यकस्यादनेकधा काचिल्लक्षणा शक्यावृत्तिरूपेणाबोधकतया जह
त्स्वार्थेत्युच्यते यथा तीरत्वादिना गंगापदस्य काचित्तु क्वचित् शक्यतावच्छेदकरूपेण शक्यस्यापि [illegible] नेव वारूपेणानुभाविकत्वादजहत्स्वार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटादिपदस्य का
चित्तु लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पर्वपर्वप्रत्यायकत्वान्निरूढा यथाऽरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य काचिच्च पर्वपर्वतारूप्येणाप्रत्यायकत्वात् आ
धुनिकी यथा घटत्वादिना पदादिपदस्य तदेवं विधाविविधलक्षणावलाल्लक्ष्यकानामपि जहत्स्वार्था जहत्स्वार्थाद्विभेदादनेकविधमिसर्थ: स्यादेतत् यदि तीरादिलक्षकत
या गंगादिपदस्य ज्ञानं तीराद्यनुभवे न भवेत् हेतु: भवेत् अप्युक्तरूपेण लक्षकाणां विभागे न वैतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया
लक्षकाणामननुभाविकत्वात् गुरुणाग्नेर्सैन्यं स्पृशेदित्यादौ शक्येन दहनादिनैव गंगायां घोष इत्यादौ लक्षितेन तीरादिना सार्धमगृहीतासंसर्गकस्यैव सप्तम्यर्थाधेयत्वादेर
न्वयबोधप्रविष्टत्वादितिचेन्न प्रकृसर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्यंतरेन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य सुवर्थाधेयत्वादेर्घोषाद्यन्वयबोधायोगात् नच शक्त
स्यैव पदस्य साकांक्षपदांतरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वयबोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्य प्रवेश: कुत: प्रविशंतीत्यादौ लक्ष्यस्य कुंतधरादेरन्वयविशेषत्वा
नुपपत्ते: कुमति: परशुरित्यादौ लक्ष्यार्थयोर्मिथोन्वयबोधस्याप्यनुभाविकत्वाच्च तस्माल्लक्षकस्य [illegible] रपि ज्ञानमानुभाविकं भवत्येव कार्यतावच्छेदकस्य संकोचाच्च न व्यभि
चार: योग रूढं नाम लक्षयति ख्यातार्थविशिष्टशब्दार्थस्वार्थयोर्बोधकमिथ: योगरूढं न यत्रैवं विनान्यस्यापि शाब्दधी: यन्नाम स्वावयवशक्त्यालक्ष्यार्थेन समं स्वार्थस्यान्व
यबोधकं तन्नाम रूढं योगि यथा पंकजं कृष्णसर्पो धर्मादि तद्धि स्वांतर्निविष्टानां पंकादिशब्दानां वृत्तिलक्ष्येन पंकजनिकर्त्रादिना समं स्वशक्यस्य पद्मादेरन्वया

नुभावकं पंकजमित्यादित: पंकजनिकर्तृपद्मं इत्यनुभवस्य सर्वसिद्धत्वात् एवं त्वस्तु विशेषोय रूढमपि मंडपरथकारादिपदं योगार्थं विनाकृतस्य रूढ्यर्थस्यैव रूढ्यर्थं विनाकृतस्या
पि योगार्थस्य बोधकं मंडपे शेते इत्यादौ योगार्थस्य मंडपानकर्त्रादेरिव मंडपे व भोजयेत् इत्यादौ समुदितार्थस्य गृहादेर्योग्यत्वेनान्वयाबोधात् योगरूढं तु पंकजादिपदं अवयववृत्त्या रू
ढार्थमिव समुदायशक्त्या अवयवलक्ष्यार्थमेवानुभावयति न त्वन्यव्युत्पत्तिवैचित्र्येण तथैव साकांक्षत्वात् अतएव पंकजे कुमुदमित्यत्र पंकजनिकर्तृत्वेन भ्रमोपंकजमुत्पन्नमित्या
दौ पद्मत्वेन पंकजपदस्य लक्षणयैव कुमुदस्थलपद्मयोर्बोध इति वार्त्तिकं ननु पुष्पं पंकजे इत्यादौ पंकजादेरन्वयाबोधात् बोधाच्च पंकजपुष्पमित्यादौ निर्विभक्तिकेन पंकजादिपदे
न उपस्थाप्यार्थस्यान्वयबोधसामान्यं प्रत्येव तादृशपंकजादिपदान्तरशब्दोपस्थाप्यत्वं तंत्रं अतस्तदुपस्थापितस्य पंकजादे: कथं पदांतरानुपस्थापिते पद्मादावन्वयबुद्धिरिति चेत् पंक
जपदेनि [illegible] संयोगाभितरुण्यामुखपंकजमित्यादौ चव्यभिचाराद् उक्तव्युत्पत्ते: संकोचेनेति गृहाण नचैवं [illegible] विशिष्टायां गावी व पंकजादि
पदस्यापि पंकजत्वत्वादिविशिष्टपद्मादेरुपस्थितिरिवास्तु ननु योगरूढिरितिसांप्रतं अन्यत्र क्लृप्तशक्तिकेभ्य: पंकजादिपदेभ्य एवाकांक्षादिसाचिव्येन पंकजनिकर्तृत्वादेर्लाभसंभवे तादृ
शिष्टस्य पद्मस्यापरोक्ष: समुदायाशक्त्यत्वात् अनन्यलभ्यस्यैव शब्दार्थत्वात् यद्यपि कर्तृवाचक डप्रत्यय एव पद्मत्वविशिष्टस्य लक्षणया लाभसंभवात् पंकजभागस्य तत्र न श
क्ति [illegible] प्रकारांतरं [illegible] शब्दस्य शब्दशक्यत्वमिति युक्तत्वात् कृतिवर्तमानत्वयोरिव एकपदार्थयोरपि कर्तृपद्मयोर्मिथोन्वयस्य संभवितत्वात् तथाप्यवयवानां
[illegible] पद्मादेस्तदर्थस्यान्वयधीविरोधिधीदशायां पंकजमस्तीत्यादित: पद्ममस्तीत्याद्यनुभवार्थमवश्यं पद्मत्वादिविशिष्टे पंकजादिभागस्य रूढिरूपेण
[illegible] अवयवव्युत्पत्त्या [illegible] स्यापि पद्मस्यास्तित्वादिना सहान्वयानुपपत्ते: अतएव पंकजादिपदाद
[illegible] पंकजमस्तीत्यादितो [illegible] साकांक्षोना मन्वयबोध: प्रत्यक्षमात्रेण उपस्थाप्यस्य पद्मतुरन्यत्रान्वये निराकांक्षत्वादिति वक्ष्यते किंचैव
[illegible] ह्ययाद्यनुभावकत्वसंभवात् वकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्विलीयते काद्रिप्रभेकव
[illegible] इति तु प्रकृते समाना [illegible] प्रत्ययमात्रस्य पद्मादौ शक्तिमाग्रहेपि पंकजादिसमुदायात्प
द्मादेरनुभवस्य सर्वसिद्धत्वात् नच चित्रगुरित्यादावपि चित्रगवाद्यवयवार्थयो समुदायस्य शक्तिप्रसंग: समासस्याविशिष्टत्वादिति वाच्यम् गृहीतावयववृत्तिकस्य
[illegible] तथाविधार्थबोधकत्वे [illegible] त्वादिति पंकजादिपदेभ्य: केवलस्यैव योगार्थस्य रूढ्यर्थस्यैव
बोधनिरासार्थं तादृशार्थयोर्मिथ: [illegible] परंतु रूढ्यर्थाभिन्नयोगार्थस्य बोधं प्रति रूढिधिय: प्रतिबंधकत्वं तेन रूढेरप्रतिसंधानदशायां

१२. अवयवशक्त्यैव पंकजं कुमुदमित्यादौ पंकजनिकर्तृत्वादिना कैरवादेरवगमस्तथावयवशक्तेरनुपस्थितौ समुदायशक्त्यैव भूमौ पंकजमुत्पन्नमित्यादौ पद्मत्वप्रकारेण
स्थलपद्मादेरत एव च तैलपदं योगेन तिलप्रभवरूपार्थाच्च विलक्षणद्रवपर्यवसितं स्नेहं बोधयेत् योगरूढमपि तैलपुत्रमित्यादौ सर्षपस्यंदतैलमित्यादौ च शक्त्यैव प्रसे
१० कस्य बोधकमिति मीमांसकानां मतमुपन्यस्यति रूढ्यर्थभिन्नयोगार्थबुद्धौ रूढेर्विरोधितेति वदंति केचिदित्येके बुद्धिस्थैः कुत्रचिदिष्यते कुत्रचित्समुदायावयवयो
रेकमात्रस्य शक्तिप्रतिसंधानस्थले यद्यपि पद्मान्यधर्मिकपंकजातत्वान्वयधीसामान्यं प्रति पंकजपदं पद्मशक्त्यभिमतं रूढिज्ञानत्वेन न विरोधित्वं तादृशधीत्वेपि
कर्दमजातादिशब्दस्य शक्त्यारूप्येण कैरवादेरुपगमात् नापि पंकजपदजन्यतादृशबोधं प्रत्येव च तथा विरोधित्वं रूढिज्ञानदशायामपि समुदायस्य लक्षणया शक्त्या
मेणा च पंकजपदात् पंकजातत्वेन कुमुदबोधस्य सर्वैरुपगमात् तथाप्यवयवशक्त्यापि पंकजपदजन्यपद्मान्यधर्मिकपंकजातत्वान्वयबोधं प्रत्येव निरुक्तनिरूढि
ज्ञानप्रतिबंधकत्वं न च कुमुदत्वेन पद्मत्वेन रूढिभ्रमदशायां तादृश्येण कुमुदस्य बोधो न स्यात् विरोधिन्याः धियः सत्वादिति वाच्यं पद्मान्यधर्मिकेत्यनेन पद्म
त्वानवच्छिन्नविशेष्यताकत्वस्योक्तत्वात् पद्मस्यैव कुमुदस्यापि समुदायशक्यत्वदशायामवयवशक्त्या पंकजातं कुमुदमित्याकारधीस्वीकारे तु कुमुदादिशाब्दत्वादिनाजन्य
त्वेन प्रतिबंध्यविशेषणीयं न च यत्र तात्पर्यधीविलंबस्थैर्यवारयोग्यताभ्रमादिना प्रतिबंधाद्रूढ्या उपस्थितपद्मयोगार्थस्य पंकजनिकर्तुरनन्वयस्तत्रावयवशक्त्या पंक
जातत्वेन कुमुदादिबोधो न स्यात् विरोधिनो रूढिज्ञानस्य सत्वादिति वाच्यं मीमांसकानां तन्मतानिष्टत्वात् तेहि मंडपं भोजयेदित्यत्रापि गृहादौ रूढिधीसत्वे मंडपादिपदा
नामवयवशक्त्या मंडपालकर्त्रादिर्न मन्यते बोधं भ्रमत्वग्रहानास्कंदितस्यैव रूढ्यर्थगोचरतत्प्रयोगयताज्ञानाद्यभावविशिष्टस्यैव रूढिज्ञानस्य विरोधितायाः स्व
चत्वाच्च यदि च समुदायस्य पद्मत्वेन पंकजनिकर्तृत्वेन च शक्तेः प्रसाद प्रमाण्यां पंकजातं पद्मं इत्साकारको बोधः प्रामाणिकस्तदानीं च पंकजनिकर्तृत्वेन कुमुद १०
स्थानान्वयधीः तदा वयवशक्त्येत्यपहाय पंकजनकपदघटकशब्दशक्त्येति प्रतिबध्यकक्षौ निक्षेपणीयं तद्घटकत्वं चेह तादृशविषयताव्यापकविषयतामात्रं तदेव
यवदस्तत्राप्यविशिष्टं यत्तु स्वावयवशक्त्या पंकजपदजन्य पंकजान्वय पंकजनिकर्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुस्तत्र कार्ये स्वविशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तम
वपत्वादृत्यं वा प्रत्यासत्तिरित्येतावतैव योगार्थमर्यादया कुमुदादेर्बोधव्युदाससंभवादुक्तक्रमेण प्रतिबंधकतायां मानाभावः पद्मत्वं वा प्रयोगोपाधिरिति प्राचीनप्रवा
दस्याप्युक्तार्थ एव पर्यवसानादिति तन्तुच्छं पद्मत्वाग्रहीतशक्तिकस्यापि पुंसः पंकजनिकर्तृत्वेनावयवशक्त्या कुमुदाद्यबोधप्रसंगात् न चेष्टापत्तिरनुभवविरोधात् न च रू
ढिज्ञानकालीनत्वमेव योगार्थस्य बोधं प्रति उक्तरीत्यापि प्रत्ययस्य हेतुत्वं तथा सति रूढिधीदशायामपि तदसमानकालीनस्य पंकजातत्वेन कुमुदबोधस्य सामान्यसामग्री

महिम्ना दुर्वारत्वापत्तेः रूढिज्ञानासमानकालीनतादृशबोधं प्रति विशेषतो हेतुत्वं तर्हि स्यात् क्लृप्तत्वात् तद्रूप्येन चातिगौरवात् यद्यपि पंकजनकर्तृषु पंकजादिपदैर्नो बो
शक्तिमत्त्वेपि पंकजपदान्तताद्रूप्येण बोधः परं तु पद्मत्वमात्रेण योगार्थमर्यादया पंकजातत्वप्रकारकबोधसामान्यं प्रति पद्मत्वविशिष्टरूढिज्ञानस्य लाघवेन विरोधित्वा
त् पद्मान्यधर्मिकत्वादिगौरवेण प्रतिबध्यके प्रवेष्टव्यत्वादतो योगरूढं नामैव नास्ति युधिष्ठिरादिशब्दानामपि रथस्थिरत्वादिके योगार्थे परिमुच्यैव वैज्ञात
विशेषप्रकारेण कुंतीपुत्राद्यवगमात् तदुक्तमभियुक्तैः यावत्तिरजहत्स्वार्थो सेयमत्रोपपादिता जहत्स्वार्थता तत्रैव यत्र रूढिविरोधिनि पंकजमनु
त्पादि वीपद्मनाभो युधिष्ठिर इति तदेतद्वैयाकरणमतं पंकजमस्तीत्यादितः पंकजातपद्ममस्तीत्याद्यनुभवस्य न्यायमीमांसादिसकलतंत्रसिद्धत्वेन गौ
रवस्य प्रामाणिकत्वादनादेयमन्यथावयवशक्त्यादेरपि प्रतिबंध्यतायामप्रवेशापत्तेः लाघवेन पंकजातत्वप्रकारकशाब्दसामान्यं प्रत्येव रूढिधियः
प्रतिबंधकत्वस्य सुवचत्वात् नन्वेवं द्रव्ये सरसिजमस्तीत्यादितो द्रव्यनिष्ठसरोजनिवद्द्रव्याभिन्ने सरसिजातपद्ममपि प्रतीयेत नामार्थयोरभेदान्वये
तंत्रस्य नाम्ना समानविभक्तिकत्वस्यानपायात् इति चेत्सत्यं समभिव्याहृतनामार्थस्य नामांतरार्थान्वये वृत्तिशब्दान्येनैव समानविभक्तिकेन नामांतरेण
तात्पर्यस्य तंत्रतायाः स्वीकार्यत्वादिति यथाहुः आकांक्षितं योग्यं संनिधानं प्रपद्यते तेन तेनान्वितः स्वार्थः पदैः समधिगम्यते इति रूढ्यर्थयो
गार्थयोर्युगपदुपस्थितौ तयोराकांक्षादिसत्त्वे व्याप्यादिह्यन्वयबुद्धिस्थले एव योगार्थस्य रूढ्यर्थस्य वा नान्यत्रान्वयेन तत्वयोरेव मिथः साकांक्ष
त्वं अन्यत्र योगार्थस्य बोधने रूढिधियः प्रतिबंधकत्वं वा प्रमाणाभावात् एवं च यत्र योगरूढिलभ्यार्थयोस्तात्पर्यग्रहः पद्मरोधिसमवधाना
द्वन्नप्रथममन्वयधीस्तत्र योगार्थमर्यादया पंकजत्वेन कुमुदादेः समुदायशक्त्या च पद्मत्वेन स्थलपद्मस्य बोधो भवत्येवेति मणिकृन्मतं दर्शयति रूढ्यर्थे
न्यत्र वा यत्र यदाकांक्षादिनिश्चयः तदैव तत्र योगार्थस्यान्वयो मणिकृन्मतेः समुदायशक्त्युपस्थापिते पदांतरवस्तूपस्थापिते च धर्मिणि अवांतरवृत्तिल
ब्धार्थस्यापदाकांक्षादिनिश्चयादि तदैव तस्यान्वयबोधमुत्पद्यते संपादितसामग्रीकत्वात् रूढ्यर्थभिन्ने योगार्थस्यान्वयबोधव्युदासाय रूढियोग
पहारित्वप्रवादो रूढ्यर्थमात्रे योगार्थस्यान्वयबोधसामग्रीस्थलाभिप्रायक इति चिंतामणिकृन्मतं योगरूढं विभजते सामासिकं तद्धितांत
मिति तद्द्विविधं भवेत् योगरूढं कृदंतस्य समासत्वव्यवस्थिते तद्योगरूढं सामासिकं समासात्मकं कृष्णसर्पादि तद्धितांतं वासुदेवादि

रूढंतस्य पंकजादि योगरूढस्य सामासिकएवांतर्भावद्रूतिनाधिकं योगिकंनामलक्षयति [illegible]र्थमात्रस्य बोधकंनामयोगिकं समासतद्धितांतश्च कृदंतश्चेतितत्त्रिधा यन्नामयं

श.प्र. तन्निविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधंप्रति हेतुस्तन्नाम तादृशार्थे योगिकं योगरूढं हि कृष्णसर्पादिपदं योगार्थेनावच्छिन्नस्यैकस्यार्थस्यबोधकं न तु तन्मात्रस्य तत्र

११ योगिकं त्रिविधं समासतद्धितांतं कृदंतं च सर्वं चेदं रूढान्यत्वेनविशेषणीयं नातः सकृष्णसर्पादौ पंकजादौ वा योगरूढेतिप्रसक्तेः ब्राह्मणीत्यादौ स्त्रीप्रत्ययांतेऽपि वाद[illegible]वाचि

त्वेन तादृशंनाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमतितत्तदर्थे रूढमेव नातो विभागव्याघातः योगिकेषु समासं लक्षयति या[illegible]महावाक्यस्यांतर्गतादिनिजार्थके यादृशस्य

र्थधीहेतुः समासः सतदर्थकः यादृशमहावाक्येनार्थस्य तत्त्वादिः स्वार्थस्य यादृशार्थावच्छिन्नविषयताशालिबोधहेतुस्तादृशतद्वाक्यतथाविधार्थे समासः धा

वकादिकर्तृ पाककर्त्रादृष्टार्थकं वाक्यमपि स्वघटकानेकनामलभ्य तादृशार्थबुद्धिविरहात् न महावाक्यं प्रकृतार्थमात्रावच्छिन्नस्यार्थस्यान्वयबोधं प्रति अयोग्यत्वं वा

कृते महत्त्ववाच्यं तेन रूपकृत्यादौ नाव्याप्तिर्न वा नीलघटत्वमित्यादौ नीलघटत्वभागातिप्रसंगः क्षीरपायीत्यादिकस्तु प्रकृत्यर्थावच्छिन्नकृदर्थस्यान्वयबोधे समर्थो

पि न प्रकृत्यर्थमात्रावच्छिन्नस्य तत्र तान्वयशीलसामान्यस्याप्रत्ययात् राज्ञः पुरुषत्वमित्यादितो राजन्येन पुरुषत्वावच्छिन्न प्रतीयते न तु राजपुरुषस्य भावस्तद्धितार्थे नाप्रकृत्यर्थ

मात्रान्वितस्वार्थबोधकत्वादतो राजपुरुषत्वमादिभागेनप्रसंगः पार्थपाथामित्यादि मतंभागस्तु स्वार्थावच्छिन्नस्य धात्वंतर्गतार्थस्यान्वयबोधको न तु त्वादिप्रत्ययस्य प्र

कृत्येव तादृशसमासव्यपदेशो व्यवादिशब्दसंस्कारप्रयोजनको गौणः विभज्यते [illegible]विधः कर्मधारयादिप्रभेदतः यच्चोपपदसंज्ञान्यस्तेनासौ सप्तधा

मतः समर्थानिरूढः समासः कर्मधारयद्विगुतत्पुरुषाव्ययीभावबहुव्रीहिद्वंद्वभेदात् षड्विधः यत्त्कुंभकारादिरूपपदसंज्ञः समासोऽस्तितेन सप्तमः समासः

सप्तविधः संकाशादिनामिकाशादीनामिव कुंभकारादिशब्दानामपि दुपपदार्थान्वितस्यैव स्वार्थस्य बोधकतया तथाविधपदात्तत्रमेवत्वैतस्य समासांतरादि दोषः ११

ननु षडिति षड्विधः सप्तविधो वा समासस्तदाऽस्य पंचविधत्वोक्तिः प्राचांमार्गगतेत्यतस्तामुपादयति [illegible]सर्वान्यपदप्राधान्यतः पुनः प्राच्यैः पंचविधः प्रोक्तः

समासो वावदादिभिः कश्चित्तु समासः पूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्वपदप्रधानउच्यते यथा प्राप्तजीवापर्धपिप्पलीपूर्वकायादिकस्तत्पुरुषोयथा

वोपकुंभाद्यव्ययीभावः पुरुषसिंहादिकर्मधारयश्च कश्चिन्मध्यपदार्थधर्मिकबोधजनकतयैव मध्यपदप्रधानो यथा पटानाधिकरणप्रतियोगितानवच्छेदकेत्यादिकः

तत्पुरुषः पटस्यनाधिकरणमित्यादिविग्रहे मध्यपदार्थस्यैव विशेष्यत्वात् बहुपदबहुव्रीहेरेवेतस्य तत्पुरुषादे बहुनामगर्भत्वाभावेतामयेमित्यत्रैवसा

धत्वात् कश्चिदंत्यपदार्थधर्मिकधीहेतुत्वादंत्यपदप्रधानोयथा राजपुरुषादिकस्तत्पुरुषो नीलोत्पलादिकः कर्मधारयो द्विगुरव्ययीभावश्च कश्चित्सर्वपदार्थधर्मिकबुद्धिहेतुत्वा

त्सर्वपदप्रधानो यथेतरेतरद्वंद्वो द्वंद्वमात्रं वा कश्चित्स्वघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानो यथा बहुव्रीहिः स्वलेप वाव्ययीभावश्च तदेवं पंचसंख्यानादा

येवपंचविधत्वं प्राच्यैरुक्तं मतो न विरोधः नित्यानित्यभेदेन समासस्य द्वैविध्यमप्यस्ति यदुक्तं त्वयादिसेन विभक्तिमात्रप्रक्षेपान्निर्ज्ञातगतनामस्तु स्वार्थस्यावबोधकबोधाभ्यां

नित्यानित्यौ समासकावितिस्वांतर्गतनामस्तु विभक्तिमात्रप्रक्षेपेण यल्लभ्यस्यार्थस्यावबोधः सनित्यः यथा कृष्णसर्पो नित्यः ज्ञिकासुरादिः कृष्णः सर्पो मक्षिका यानित्य

सुरइत्यादितस्तल्लभ्यवैजात्यादेरग्रहात् यल्लभ्यस्य च बोधः सानित्यः यथा राजपुरुषपूर्वकायादिस्तल्लभ्यस्यार्थस्य राज्ञः पुरुषः पूर्वकायस्येत्यादिवाक्यादपिप्र

तीतेः स्फुरद्वाणीचलद्वैत्ररत्नादिद्रव्यादिकर्मधारयोऽपि अनित्यएव समासः स्फुरंतीवाणीत्यादिविग्रहस्य वाण्यादौ स्फुरत्त्वादिविधेयकबोधाजनकत्वेऽपि स्फुर

द्भिन्नवाण्यादावेकत्वादिबोधकत्वमादायैव तदर्थप्रकाशकत्वात् स्फुरंतीवाणीत्यादिवाक्यस्यैव तत्र विग्रहत्वसंभवाच्च विग्रहएव समासलभ्यार्थस्य बोधकत्वं तत्र

न तु समासे विग्रहार्थस्य विग्रहलभ्ययोर्लिंगसंख्ययो लौकिकवैधुर्य प्रायशः समासावबोध्यत्वात् अतएव यत्र समासे तयोर्वैशिष्ट्य सत्वं तत्र विग्रहोपियथा

जरंती चित्रगुर्जनः प्रियतिस्रः पुरुषइत्यत्र स्त्रीत्वस्य स्त्रीप्रत्ययाति व्याद्यादेशयोः स्वाभिव्यंजकयोः सत्वात् यथा वा शलाकापरिप्रियपूर्वयादेरूपमित्यादावेकत्वादे

अक्षशलाकाभ्यां रेकत्वएवाव्ययीभावस्य पुष्पदस्यदौद्विर्वएवयुवाद्यादेशस्य सेनांगानां बहुत्वएव समाहारद्वंद्वस्यविधानात् तदुक्तं मणिकृते संख्यानुबंधकाभा

वादयत्राप्रातरूपिवत् यत्र तु बंधकं किंतत्र संख्या प्रदीप्यते शलाकापरिहस्त्यपूर्वकायार्धपिप्पलीति पर्वादेरर्थस्यचतुःसहार्थे कृत्वमंतर्भावेन वि

नात सुरूपस्य श्रुतत्वात् सरसिजारोरुकेके कालादेवालुक् समासे सुप् संख्याबगमोऽपि नक्षति तत्र वचनं सुपःसत्वेऽपि संख्या न बुध्यतेद्वितु समासशक्तिवादि

नः पातंजलाः समासेषु कर्मधारयं लक्षयति कर्मिक यन्नामयुगमेकार्थेऽन्यार्थबोधकतादात्म्येन भवेदेषः समासः कर्मधारयः कर्मिकं यन्नामद्वयं तयोरेकस्य

नाम्नोऽर्थे धर्मिणि तादात्म्येनापरनाम्नोऽर्थस्यान्वयबोधं प्रतिसमर्थः तादृशं नामद्वयं कर्मधारयः नीलोत्पलमित्यादावुत्पलादिपदस्यार्थे नीलादिपदार्थ

स्य तादात्म्येनान्वयधीस्तथा पुरुषसिंहादिसिंहसादृश्यवति पुरुषादावुत्तरपदलक्ष्यस्य सिंहादिसदृशस्य पुरुषः सिंहइवेत्यादिविग्रहे उपमेयउपमेयस्य

उपमानेरितिकर्मधारयानुशासनात् कुंभस्य समीपमित्यर्थकस्तु उपकुंभादिर्न तादात्म्येनान्वयबोधः प्रबलमध्यद्रव्यमित्यादौ संग्रहो यन्नामप

श.प्र. दस्य धातुभिन्नोपलक्षकत्वात्‌ सार्थक सामान्यपरत्वेपि सत्सभावाच्च नीलमुत्पलमित्यादौ तु समानविभक्तिकं नामद्वयं स्वार्थयोरभेदान्वयबोधयेदपि न
क्रमिकं विभक्त्याव्यवधानात्‌ यदि वा तादात्म्येन नीलादिनामार्थस्यान्वयबुद्धौ नीलादिनामोत्तरनामोपस्थाप्यत्वं तत्र अतो न तत्राभेदसंबंधेन नीलादेरन्व
यः परं तु विशेष्यतो विशेष्यतयोपस्थापिते तादात्म्यएवाभिधेयत्वेन नीलघटपटावित्यादौ च नीलपटाव्यवहितेन घटपदस्यैव कृतत्वात्‌ नाम्ना उपस्था
२२ पितेपदे नीलस्य तादात्म्येनान्वया व्यभिचारः स्तोकं पचतीत्यादौ तु स्तोकादेर्धात्वर्थे तादात्म्येनान्वयबोधः समास
विग्रहयोस्तुल्यार्थकत्वाव्यापनेः परं तु राजसंबंधस्येव ५ किंतु द्वितीयाद्यर्थे तादात्म्यएवाधायत्वेनेत्यादिक विभाव्यते तदा क्रमिकत्वमनुपा
देयमेव राजपुरुष इत्यादिक स्तत्पुरुषो न पुरुषोपरि पूर्वपदलक्षितस्य राजसंबंधिनस्तादात्म्येनान्वयः ५ अतएव राजपुरुष इत्यादौ पूर्वपदे षष्ठ्यर्थसंबंधे
लक्षणेति मणिकृन्मतं दुष्कमपि संगच्छते यथा च नामार्थयोर्भेदेनान्वयेपि न क्षतिस्तथोपरिष्टात्‌ वक्ष्यते किंचित्निष्ठत्वं वर्धमानवत्ति न तस्यैव ताता
दात्म्येनान्वयबोधकत्वमुक्तानि तत्कौ निवेदनीयं नचैवमपि पंचपूलीत्यादि द्विगौ द्विगार्ग्यगच्छत इत्यादिस्थलीये द्वितीयाद्यभिन्नगार्ग्यादि बोध
काव्ययीभावे चाति व्याप्तिस्तदन्यत्वेनापि विशेषणीयत्वात्‌ अत्र च मानुषब्राह्मणो ब्राह्मणमानुष इत्याद्यप्रयोगात्‌ विशेषणविशेष्ययोर्यत्राभि
धस्तादात्म्येन व्यभिचारस्तत्रैव कर्मधारयः साधुः प्रमेयधूम इत्यादौ तु नरस्य शरीरं राहोः शिर इत्यादाविव तादात्म्यसंबंधाघटक षष्ठ्यात्पुरुषप
वेतिवृद्धाः चंदनतरुर्विंध्यगिरिर्वसंतसमय इत्यादिप्रयोगस्य प्रमाणत्वात्‌ विशेष्यस्यैव विशेषणव्यभिचारित्वं तत्र न तु विशेषणस्यापि तद्व्यभिचा
रित्वं पुरुषोत्तम इत्यत्र च उत्तमत्वं न निकृष्टत्वानादिमत्वं किंतु भ्रमविधुरत्वं अतएव तत्र पुरुषस्यैव पुरुषत्वेपि तस्य व्यभिचारसत्वात्‌ उत्तमपुरुष इत्यपि
कर्मधारयः साधुरिति नव्याः तदा पुनरपदकः कर्मधारयः प्रायशो नेष्यते नीलतद्वस्त्रीत्यादितो जातापि नीलोत्पलादेरुक्तत्वादेरप्रतीतेः परं तु पद्मकोशनम्य
मानत्वोक्तत्वं यथा नीलपद्म इसआस्वाद्यकरन्द तद्रूपमीक्षते इत्यादिप्रयोगात्‌ क्वचिदिष्यतेपि प्रत्युतं तु इन्द्र इदनीदिना परमः सद् इत्यादौ परमसः
परमतो विशादि तत्पुरुषोप्येतेन व्याख्यातः ननु विशेष्यतया नामार्थप्रकारक अन्वयबुद्धिमात्रं प्रत्येव नामोत्तरविभक्त्युपस्थाप्यत्वं तंत्रं

ननु तादात्म्यसंबंधानवच्छिन्नतत्प्रकारताक बुद्धिगौरवादतो नामार्थयोर्नीलोत्पलयोरन्वयासंभवात्‌ कर्मधारयादिकः समासो नैयोगिकः किंतु नीलोत्पलत्वविशि
ष्टे रूढ एव तदुक्तं भर्तृहरिणा अबुधान्‌ प्रत्युपायाश्च विहिताः प्रतिपत्तये शब्दा तत्त्वादसंतं भेदो वाक्यसमासयोरिति वैयाकरणाः तन्मंदं नीलोत्पलमित्यादौ समुदा
यरूढ्याप्रतिसंधानेपि नीलादिप्रत्येकपदार्थोपस्थितिसात्तयोस्तादात्म्येनान्वयबोधस्यानुभविकत्वेन गौरवस्याप्रामाणिकत्वात्‌ अन्यथा नामार्थस्यान्वयबोधसा
मान्यं प्रत्येव नामोत्तरनामोपस्थाप्यत्वं तंत्रं उरीकृत्य नीलमानयेत्यादौ नामार्थसुबर्थयोर्नान्वयबोधः परं तु सुबंतभागस्य नीलनिष्ठकर्मत्वादौ रूढिरेवेत्यपि किं
नरोच्यते नचसमासस्यापि शक्त्वे नीलो द्रव्यंचघट इत्यादाविव नीलघटो द्रव्यमित्यादावपि घटधर्मिण्येकत्रद्वयमित्यादिन्यायेन नील द्रव्ययोस्तादात्म्येनान्व
यापत्तिरितिवाच्यं नामार्थस्य मुख्यविशेष्यताकद्व तादात्म्यावच्छिन्नविधेयताकेपिबोधे नाम्नः प्रथमांतत्वस्य तंत्रत्वात्‌ विधेयत्वं तु विषयतावच्छेदकता
न्यप्रकारत्वं प्रकारताप्रभेदो वेत्युन्नेतव्यं पटमित्यादौ पटादेर्न तादात्म्येन विधेयत्वमिति न तत्र व्यभिचारः ननु नीलपीतं चोत्पलं यत्र इत्यर्थे नीलपीतोत्पलं
तत्पुरुषादिको बहुव्रीहिरिव नीलं पीतं चोत्पलमित्यर्थे नीलपीतोत्पलं पुष्पमित्यादिकः कर्मधारयोप्येकत्र द्वयमितिन्यायेन नीलपीताभ्यामवच्छिन्नोत्पलनिष्ठधर्मिताकधीजनकः एवं न स्यात्‌
द्वन्द्वत्वेन बहुपदबहुव्रीहिरिव नेतरेतरयोगद्वन्द्वान्यः समास इत्यनुशिष्टत्वेन बहुव्रीहेरेव स्वनिष्ठनामद्वयोपस्थाप्यार्थद्वयावच्छिन्नतादृशनामांतरार्थनिष्ठविषयताकबोधप्रतिहेतुत्वेन समा
सांतरस्य तादृशबोधे प्रत्यसमर्थत्वात्‌ नीलपीतोत्पलेरम्य पीतनीलोत्पलमित्यादौ तु नीलोत्पलं पीतोत्पलं च रम्यं इत्याकारकबोधो ननु नीलं पीतं च मधुसलेन प्रत्ययमित्या
कारः अतएव हस्त्यश्वरस्य प्रत्येकाभिसंधित्वसूचनार्थं नीलपीते चोत्पले चेत्यादिकमेव तत्र विग्रहं वर्णयंति ननु नीलं पीतं च तत्‌ उत्पलं चेत्यादिकं घटस्य नाधिकरणमित्या
दि विग्रहे घटानधिकरणमित्यादिक एक मध्यमपदप्रधानस्तत्पुरुषो न बहुनामगर्भो नवा एकत्र द्वयमिति न्यायेन स्वार्थस्य बोधक इति संप्रदायविदः स्यादेतत्‌ समानसमुदा
यसक्तत्वे वायस्पतिमिताया सप्ताके कंबर्णा पुमान्‌ इत्यादौ वाचिमिताय्याः कं केचत्थामादौ नाभेदेनान्वयो वा गादे पदार्थैकदेशत्वेन तत्पदार्थो तरस्य पदार्थपदैर्गागतं सम
वेतमित्यादाविव निराकांक्षत्वादेवं पत्न्यादि जाति स्वाध्याये जटाभिस्तापस इत्यादौ पत्नीसहभावस्य द्विजादेर्जटादेर्वैशिष्ट्यस्य च तापसाभेदेनापि नान्वयो यथा
कारमभिघातादित्यादौ यौगिकत्वेन तत्र तत्र तथाविधान्वयेद्वर्णागोयाकप्रभतेः पदार्थत्वादिति चेन्न इत्येकदेशपदस्यार्थे संबंधस्य कारकस्य वा बोध

श०प्र० कान्माविभक्तेः स्वार्थानुभावकतायां निराकांक्षत्वादेव तस्य निरस्तत्वादत एव चैत्रस्य गुरुकुले शेते शातिकपत्रकद्धमुप्ते गुर्वादिपदस्य इसाएकदेशत्वेपि तदर्थे प्रत्ययार्थसं
बंधस्य तृतीयार्थकरणत्वादेश्चान्वयः सर्वसिद्धः समासस्यैव वाक्यत्वादिप्रसंगात् तस्यापि प्रकृतित्वात् परिष्कृतायाः सततं यस्तु वाचस्पतीयेते संपदाततयावाचि
२२ पुत्रीयाति सपुरुष इत्यादेरपि वागाद्यंशे परिष्कृतादेः पुत्राद्यंशे च संपदादेः सहभावादिबोधकतायां न सामर्थ्यमत एव प्रतियोगिपदादन्यपदन्यत्कार
कादपि ध्वनिशब्दैकदेशार्थेन तस्यान्वयदृष्यते इसंपन्ति कर्मचां नाज्ञयोगो यं कुरूपापक्षयं ममेत्यादौ च योगो ह्यभिसस्ययोगात्रयोज्यमर्थः सचा
भेदेन पापक्षयान्वितः यस्मिन् राशिगते सूर्ये विपत्तिं यान्ति मानवाः तेषां तत्रैव कर्तव्या पिंडदानोदकक्रियेति वचनं तत्वमूले समूले च यस्मिन् राशौ गते
गतेत्यर्थे इत्येव तत्र पाठ इत्यास्तां विस्तरः द्विगुं लक्षयति संख्याशब्दस्य उत्तरनाम तदलक्ष्यार्थबोधकं अभेदेन वयं तत्वार्थं सद्विगुस्त्रिविधः मतः संख्या
वच्छिन्नशक्यस्य तदोत्तर खलिशिष्टं यन्नाम स्वार्थधर्मिकतादात्म्येन तदलक्ष्यार्थस्यान्वयबोधं प्रति समर्थं तन्नामोत्तरतापन्ने तन्नामैव तदलक्ष्यार्थाभिन्नस्वा
र्थे द्विगुरुच्यते त्रिकटु त्रिभुवन चतुर्युग चतुर्वर्ग पंचनख पंचगव्य पंचामृत षड्रस षट्पदार्थ सप्तर्षि अष्टगा अष्टवसु नवरस नवग्रह दशमूलैकादशरुद्रैकादशे
न्द्रिय द्वादशादित्यादिसाध्य स्तु कर्मधारयः द्वारित्वार्थ त्रित्वावच्छिन्नबोधकतया न पूर्वपद लक्ष्यार्थस्य बोधकत्रिकटु प्रभृतिषु कटुत्रयादिसामान्यस्याप्रतीतेः
पंचमूलीत्यादेः पंचमूलं च कं तेनैव मूलविशेषे तात्पर्यं न तु विशेषरूपेणापि अत एव कंटकार्यादिकं स्वल्पं गांभीर्यादिचयं महत् पंचमूलं तदुभयं दशमूलमुदाहृ
तमित्यादिकं सादृश्येण बोधस्य लीयप्रयोगः वर्षाकाले मघर्क्षेणापि युक्ता चापि त्रयोदशी इत्यादिवदेकवचनस्य साधुत्वसंभवात् द्व्योरूपमित्याद्यर्थे द्विरूपा
दिपदं नाभेदेन द्विप्रभृतेरनुभावकं एकत्वसंख्यया विशिष्टबोधकं यदेकपदं न पर्याप्ति संसर्गेण तदवच्छिन्नस्य बोधकं द्वित्वादिपदं पर्याप्त्या द्वित्वावच्छिन्नप्र २२
ति पादयेदपि न तत्र शक्तिः वाक्यत्वादतो नैकघटद्वित्वपटेत्यादि कर्मधारयेति प्रसंगः सप्तसतीपञ्चशत्यामित्यादौ च --- सतेधर्मिणि सप्तानामभेदेन ना
न्वयो बाधितत्वात् नापि सप्तलक्षितस्य सप्तगुणितस्य द्विगुत्वहान्यापत्तेस्तथापि शतपदार्थस्य एकदेशे शतत्वसंख्यायां तस्याः सप्तत्वसंभवादिति
वदंति द्विगोर्गर्भे गच्छत इत्यादावव्ययीभाववारणं तु पूर्ववत् सचायं द्विगुस्त्रिविधः तद्धितार्थोत्तरपदसमाहारभेदात् तद्धितार्थद्विगुं लक्षयति त-

द्धितार्थान्वितस्वार्थे तद्धितार्थद्विगुर्मतः तद्धितार्थे लाक्षणिकत्वात् नामको द्विगुरेव तद्धितार्थो द्विगुरिति फणिभाष्यमतं न युक्तं असर्वगतत्वात् पांचपुरुषि
रित्यादौ पंचानां पुरुषाणामपत्यस्य पंचगर्गरूप्य गोरित्यादौ पंचानां गवां भक्तपूर्वस्य बोधने तद्धितेनैव स्वार्थस्यापसप्रमतेरुपस्थापनात् द्विः स्वर्णमयः
पद्युरित्यादावुत्तरपदस्य शक्तिविरहेण क्रीताद्यर्थे लाक्षणिकत्वायोगाच्च उत्तरपदद्विगुं लक्षयति स्वांतं निर्विष्टशब्दघटितशब्दांतरसमासगः योद्विगुः शा
ब्दिकैरुक्तः स उत्तरपदद्विगुः योद्विगुः स्वघटकनामभ्यां सह सांकांक्षनामांतरेण समासस्यांतर्गतः स उत्तरपदद्विगुः यथा पंचगावो धनमस्येत्या
दिविग्रहे पंचगवधनः पुरुष इत्यादौ बहुव्रीह्यादि निविष्टः पंचगवादिः समाहारद्विगुं लक्षयति स्वार्थान्वितसमाहारलक्षकस्वांत शब्दकः उक्ताभ्या
मितरः किंवा समाहारद्विगुर्द्विगुः स्वोपस्थाप्यार्थस्य समाहारलक्षको यदीयांत्यशब्दः स द्विगुः समाहारद्विगुः पंचफली सत्र योगसंभवा
नां पंचविधफलानां समाहारः पदस्य फलशब्देन लक्ष्यते न तु तत्र द्विगोः शक्तिरन्यलभ्ये शक्त्ययोगात् अत एव न लक्षणयापि कैः शक्यसंबं
धस्यैव लक्षणात्वेन वाक्ये तदसंभवात् यदि च पंचफलीयतः पंचानां फलानामेव बोधो न तु तत्समाहारस्यापि अत एव पंचफलीछिनोतीत्यादिप्र
माणं अन्यथा समाहारस्याछेद्यत्वसंभवेन तदयोग्यतापत्तेः फलादेर्द्वित्वबहुत्वेपि एकवचनत्वानुशासनिकं दारादेर्बहुवचनवदु
पपत्स्यते न च द्रव्यप्राधान्ये पंचषडिसप्ततौ इत्युक्तत्वान्न स्यात् गोशब्दस्यैव स्त्रीप्रसस्यापि समासांतस्य उपसर्जनस्यैव तद्विधानादिति वाच्यं समाहारद्वि
गोरर्थत्वस्य स्त्रीप्रत्ययस्य पृथगेवक्त्रस्वविधेर्वक्तव्यात् प्रयोगानुसारित्वात् कल्पनीयाः पंचपात्रकी इत्यादावव्याप्तिश्च तत्रोत्तरपदस्य वाक्यत्वेन लक्षक
त्वायोगात् इति लक्ष्ममीक्षेत तदा पूर्वनिरूक्ताभ्यां तद्धितार्थोत्तरपदद्विगुभ्यां भिन्नद्विगुरेव समाहारे द्विगुर्बोध्यः एवं च द्विगोः कर्मधारयत्वा
र्गतत्वेपि न क्षतिरिति तु विभावनीयं तत्पुरुषं लक्षयति यदीयेन सुबर्थेन युतयद्बोधनक्षमः यः समासस्तस्य तत्र स तत्पुरुष उच्यते यदर्थगतेन सुबर्थेन विशिष्टस्य
पदार्थस्यान्वयबोधं प्रति यः समासः स्वघटकयोग्यः स तदर्थस्य तदर्थे तत्पुरुषः नतु यन्नामोत्तरं यन्नाम यदर्थगत सुबर्थावच्छिन्नस्य यत्स्वार्थस्य बोधकं
तदुत्तरतन्नामैव तदर्थयोस्तत्पुरुषः पूर्वकायादिपिप्पल्यादावव्याप्तेः स्तोकपक्वे इत्यादौ क्रियाविशेषणे कर्मधारयएवं महाकवि महाविद्य इत्यादौ कविवि
द्यादाविवप्रकृते त्वेकनामार्थैकदेशे पचनादिवर्पानामार्थस्याभेदेनान्वयबोधकतया तथात्व संभवात् स्तोकं पक्के इत्यादाव मे स्तादा इत्यं वाचे

११· हेतु तत्पुरुषः संख्यासेव क्रियाविशेषणेः समाप्त एवा व्युत्पन्न इति तु न देश्यं स्तोकं नम्रा स्तनाभ्यामित्यादेः कालिदासाद्यैः प्रयुक्तत्वात् द्विगोः कर्मधारये चे शाब्दिका
नां तत्पुरुषत्वव्यपदेशः परं स्वकार्यार्थो गौणः विभज्यते द्वितीयादिसुबर्थस्य भेदादेव चषड्विधः क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः ग्रामगतश्चैत्रनीतो
२४ ब्राह्मणदत्तो वृक्षपतितश्चैत्रधनं मैत्रगतिर्गृहास्थित इत्यादौ द्वितीयादिसुबर्थस्य कर्मत्वकर्तृत्वादेर्बोधभेदादेतस्य द्वितीयातृतीयादितत्पुरुषत्वेन षड्भेदः स्वघट
क एकपदार्थनिष्ठ द्वितीयार्थावच्छिन्नाऽपरपदार्थबोधकः समासत्वादिधर्मविशेषस्य सुवचत्वात् इयांस्तु विशेषो यदेतेषु धात्वर्थान्वय्येव द्वितीयादेरर्थः प्रायोऽ
इकः पीठंपरितः पुण्येन सुखं समाप्य विवादं डाहुटो गवां संपन्नक्षीरा इति लेषु तेल मित्यादि विग्रहे तत्पुरुषस्यासाधुत्वात् वर्षसुखी लोभकाणः कुण्डलैर्हिरण्यं
कुबेरपतिः पटान्यः कर्मकुशल इत्यादौ तु तत्तद्विशेषविधेर्द्वितीयादितत्पुरुषः ननु ग्रामगत इत्यत्र गतो ग्रामकर्मत्वस्य राजपुरुष इत्यत्र पुरुषे राज्ञसंबंधस्याद्ग
मो न ग्रामपदेभ्यो लुप्तमुपस्मरणात् तल्लोपमजानतोऽपि अन्वयबोधात्सिमं कुं ग्रामगतश्चैत्र इत्यादितः समकृग्रामयोरभेदान्वयधीप्रसंगाच्च संपन्नं दाधिपश्च
त्वादा विवतत्रापि नामार्थयोरभेदान्वयबोधोपयुक्तस्य नाम्नोः समानविभक्तिप्रतिसंधानस्याविशिष्टत्वात् नापि ग्रामादिपदस्य ग्रामकर्मत्वादिलक्षकत्वात् अभे
दान्यसंबंधेन नामार्थस्यान्वयबोधं प्रति अनुकूलस्य नामोत्तरविभक्त्युपस्थाप्यत्वस्य तादृशप्रत्ययोपस्थाप्यत्वस्य वा गतादावसत्वात् न च ग्रामादिपदलक्षितस्य
ग्रामकर्मकादेरेव तत्र गत्यादौ तादात्म्येनान्वय इति सांप्रदायिकानां मतमेव सांप्रतं तत्पुरुषस्यापि समस्यमानपदार्थयोरभेदान्वयबोधकत्वे कर्मधारयत्वाप
त्तेः ग्रामं गतो राज्ञः पुरुष इत्यादि विग्रहस्य समासतुल्यार्थकत्वहान्यापत्तेश्चेति चेन्न प्रत्ययांत तत्तन्नामार्थस्य भेदेनान्वयबोधं प्रति तत्तन्नामोत्तरप्रत्ययो
पस्थाप्यतायास्तत्र हेतुत्वेन ग्रामगत इत्यादौ ग्रामादिपदलक्षितस्य ग्रामकर्मत्वादेर्गत्यादेरभेदान्वयबाधकाभावात् नन्वेवं गतो ग्राममित्यत्रापि ग्रामपदलक्षितस्य ग्राम २४
कर्मत्वादेर्गत्यादौ भेदान्वयबोधप्रसंगः प्रत्ययांतान्यतमोपस्थाप्यार्थस्यान्वयबोधसामान्ये प्रत्ययोत्तरगतत्वस्य तत्र नाम्नो तरनाम्नोपस्थाप्यत्वस्य
हेतुत्वेन तदसंभवात् अतएवार्धपिप्पलीकेदृशादौ पूर्वपदप्रधानत्वेन अनुशिष्टस्य तत्पुरुषादेः संपदार्थानां पिप्पलीप्रभृतीनामर्धाद्यर्थे घटपदम
नामित्यादौ सर्वपदप्रधानत्वेन द्वंद्वस्यानंतपदार्थानां घटादीनां कुंभादौऽन्वयसंभवात् बकुगुडप्रक्षेपक इत्यादौ गुडादीनामपि बकुजर्थे प्रकृतसर्वस्य द्विपदसमासेतो

= तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः इति नञ्वादे ५
नाम्नोऽत्राग्रकृतो विधानादिति ननु यदि नामार्थयोरभेदान्वयो व्युत्पन्नस्तर्हि ग्रामगत इत्यादौ कर्मत्वादिसंसर्गेणो ग्रामादेरेव गत्यादावन्वयोऽस्तु कृतं ग्रामादिशब्दस्य ग्रामकर्म
त्वादिलक्षणयेति चेत्सत्यं विग्रहवाक्यानां समाससमानार्थकत्वरक्षायतत्र लक्षणास्वीकारात् मास्तु वा ग्रामादिपदस्य तत्कर्मत्वादौ लक्षणा कर्मत्वादिसंसर्गेणैव ग्रा
मादेर्गत्यादावन्वयसंभवात् तथापि न क्षतिः ग्रामं गत इत्यादि विग्रहस्यापि कर्मत्वार्थकद्वितीयाद्युपसंधानवशादेव कर्मत्वादिसंसर्गेण गत्यादौ ग्रामाद्यन्वयबोधकतयास
मासमानार्थकत्वसंभवात् ग्राममित्यादौ कर्मत्वादिधर्मिकबोधानुरोधेन द्वितीयादेः कर्मत्वाद्यर्थकत्वात् अतएव घटः पटः इत्यादौ अन्यस्यासुरो देव इत्यादौ विरोधि
नोऽनिक्षुः शर इत्यादौ सादृश्यस्याब्राह्मणो वार्धुषिक इत्यादावप्रकृष्टस्यानुदरा सुंदरं तरुण्या इत्यादौ स्वल्पस्य वाचकेच नञ्निपाते नञर्थे प्रतियोगित्वादिसंबंधि
नैव घटादेरनुभावने पितत्र सतत्पुरुषे नातिव्याप्तिः शाब्दिकास्तु अब्राह्मण इत्यादावारोपितब्राह्मण इत्यादिरर्थो ब्राह्मणभिन्न इत्यादिस्तु फलितोऽर्थः अन्तर्भिन्नेह
दोऽसर्वनाम कार्याय उत्तरपदप्राधान्यावश्यकत्वात् एतत्तदोः शिति सूत्रे न ञ्ग्रहणं चात्र प्रमाणमित्याहुः पटस्याभाव इत्यर्थे प्रसज्य नञा अव्ययीभाव एव समासः
प्रमाणं तेनापं वर्त्तते इत्यादौ तु तत्र प्रयोगः तत्पुरुषस्य उत्तरपदालिंगकत्वनियमादिति वदंतः प्रसज्यनञा अप्यपट इत्यादि तत्पुरुष एव साधुर्नाव्ययीभावो नञ् स्ये
तत्पुरुषविधेस्तदपवादकत्वात् अतएव वादिनामविवादः क्रियावत्यादौ पुंसि प्रयोग इति पक्षधरमिश्राः युज्यते चोत्तरः कुत्सो नन्वेदेवं इत्यनैराज्ञमातंगात्सेवा
मीतु रंगमाः चैत्रं ग्रामगतस्य मैत्रं किं कुरुतेऽधुना इत्यादौ राजसंबंधादेः राज्ञपदलक्ष्यत्वे तदेकदेशस्य राजादेस्तदा परामर्शो न स्यात् तदा विशेष्यविधया इत्यापू
र्वोपस्थापितस्यार्थस्य परामर्शकत्वात्तदादिशब्दानां नाहि प्रजावतीयं मे त्वं तस्ये देहि केवलं नीलोमणिर्गुणः सोऽत्र भावादिर्बोध्यते तदा ननु एतयेव रीत्या निषादस्थप
तिं याजयेदिति श्रुतौ निषादानां स्थपतिरिति व्युत्पत्त्या न तत्पुरुषः परंतु निषादस्थपतौ कर्मधारय एवेति सिद्धौ त्वया हन्येत तत्पुरुषे त्वाभिधानात्तत्र कर्मधारयस्वीकारेण
म्लिकानिषादस्याधानापूर्वविद्याप्रयुक्तिः श्रुते कल्पते कल्प्यते चानिपठीय तन्नाध्ययने निषेधविधिबाधात् स्त्रीशूद्रौ नाधीयातामिति श्रुतौ तेन द्वयध्ययनेतराध्ययन
परत्वं धातोः शूद्रपदस्य चत्रैवर्णिकान्योपलक्षकत्वात् यदि च कर्मधारयवत्तत्पुरुषेऽपि न लक्षणा तदा तत्पुरुष एव तत्र उचितः त्रैवर्णिकत्वेन निषादीयस्थपतित्वेन प्रा
प्तावकृतविद्या प्रयुक्तेस्त न्मूलक निषेधविधिसंकोचस्य वा कल्पनादिति चेत् तत्पुरुषे लक्षणापत्तेरपि किमिति कर्मधारय एव तत्राभ्युपेयते ननु तत्पुरुषः निषा
दानां स्थपतिरिति व्युत्पत्त्या निषादस्थपतिपदात् निषादसंबंधवत्वेन स्थपत्यनुभवसहस्रस्य सर्वसिद्धत्वेन तदनुरोधात् लक्षणायाः कृत्यत्वेन तत्कल्पनाभयस्यासंभवात्
नहि निषादस्थपत्यादिक निषादादिसंबंधवत्तया स्थपत्यादिबोधने निराकांक्षं तथा सति निराकांक्षत्वादेव तत्पुरुषत्वासंभवे लक्षणापत्तेरसाधकतया न्यासा

श०प्र नौचिसात् अव्ययार्थं विना स्वार्थएकश्रुतीनां प्रामाण्यं न तु प्रमाणांतरविषये अलक्ष्यार्थे गुरवेरावस्वासद्रसादि मीमांसायां तथैव अविषये रिक्षपि किं नरोबये तत्पुरुषादुः बहुव्रीहेर्येषधन्यत्वमि
१५ त्यत्राप्युक्ते वर्तते रनुसर्तव्या नहि बहुव्रीहौ समस्तपदानां लाक्षणिकत्वादेव तत्तोद्बोधकत्वं एकपदमात्रलक्षणायामपि बहुव्रीहेर्व्यवस्थाप्यत्वादिसाकांक्षविस्तरः अव्ययीभावं लक्षयति
उत्तरपदार्थान्वितस्वार्थाव्ययपूर्वकत्वं यो भवेत् समासः सोऽव्ययीभावः स्त्रीपुंलिंगविवर्जितः समासः स्वोत्तरपदोपस्थाप्येनान्वितस्य यदर्थस्य बोधकोऽव्ययपूर्वभागकः सतद्विशिष्टस्य तदर्थ
स्य बोधनेऽव्ययीभावः यदुनिमक्षिकं उपकुंभमित्यादौ हि मक्षिकाया अभावः कुंभादेश्च सामीप्यादि मक्षिकादिपदप्राग्वर्तिनानिराद्यव्ययेनानुभाव्यते अर्धशरीरमित्यादावुत्तरपदा
र्थान्वितस्वार्थबोधकमर्धपदं नाव्ययं निर्मक्षिकाणि मिनिर्मनुष्यादेशइत्यादौ तु मक्षिकादेरभाववंतं बोधयन्नपि निर्मक्षिकादिकं तत्पुरुषेण ताद्दृशार्थे स्त्रीपुंलिंगकार्यविधुरइति
न तत्र प्रसंगः ननु एवं सूपप्रतिसूपशलाकाप्याद्यर्थेऽव्ययावनामित्यर्थे अक्षपरि शलाकापरि इत्यव्ययीभावे अव्याप्तिः तस्याव्ययगर्भेत्वेपि तत्पूर्वकत्वाभावात् द्वौगार्ग्यौ इस
र्थे द्विगार्ग्यमकृत इत्यादौ द्वाभ्यां दंडाभ्यामित्यर्थे द्विदंडिप्रहरतीत्यादौ तिसृणां यमुनानां समाहारस्त्रियमुनं स्नातीत्यादौ लोहितगंगाया अभिन्नत्वेऽर्थे लोहितगंगो देश इत्यादौ दंडेनमिथः
प्रहृत्य कृतं इत्यर्थे दंडादंडिरणइत्यादौ केशेषु मिथः प्रगृह्य कृतमित्यर्थे केशाकेशियुद्धमित्यादौ +इत्यर्थे+ खलेयवायदासंहृतायथवायदातिष्ठति मावोयदे साधर्थे खलेयवं संहृत
यवं तिष्ठद्गुकालइत्यादौ द्विगार्ग्यमिति दंड्यादिष्वपि तेषु अव्ययगर्भत्वस्याप्यभावात् अतः प्रकारांतरेणानिर्वक्ति अमादेशं विना श्रूयमाणषष्ठीनबोधिकां स्वार्थे यदर्थस्य द्वा
सोऽव्ययीभाव उच्यते अमादेशं विना श्रूयमाणषष्ठी स्वार्थे यत्समासार्थस्यान्वयबोधं प्रति असमर्था स एवाव्ययीभावः श्रूयमाणो व षष्ठी स्वार्थे समासांतरार्थस्यान्वयबोधने
समर्था नकृताकृतयोरस्यपरिवर्धनं इत्यादौ तु अव्ययीभावार्थस्य लुप्तापि कृतयोरेकाद्यान्यथापातनयोर्निष्फलत्वमित्यन्वये लुप्तषष्ठ्यैव पातनसंबंधस्य प्रसाधनात् स्निग्ध
स्योपगंग पीविश्व इत्यादौ स्निग्धस्य गंगासमीपस्य पवित्रत्वमित्याद्यन्वये समीपादेः संबंधश्च तथाप्यमादेशवशादेव षष्ठ्यनुभाव्यत इति न तत्रोपगंगाधव्याप्तिः अनुगंगेन
संचारः उपकुंभेषु पूर्वेत्व मुपकुंभादानीतमित्यादावमादेशं विनापि श्रूयमाणाभिस्तृतीयासप्तम्यादिसुभिरव्ययीभावार्थस्य करणत्वाधिकरणत्वादिकं बोध्यत इति
षष्ठीपर्यंतानुसरणं बहुव्रीहिं लक्षयति बहुव्रीहिः स्वगर्भार्थसांबंधित्वेन बोधकं निरूढ्यालक्षणयास्वांशतापकशब्दवान् समास इति प्रकृतं तथा च स्वांश १५
स्य च निरूढलक्षणया ज्ञापकेन शब्देन घटितस्य गर्भस्य यादृशार्थस्य संबंधित्वप्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थबोधने बहुव्रीहिरिस
र्थः आरूढवानरो वृक्ष इत्यत्रारूढो वानरो यमिति व्युत्पत्त्या स्वकर्मकारोहणकर्तृवानरसंबंधित्वेन वृक्षं पीतपयस्कं पात्रमित्यत्र पीतं पयो येनेति रीत्या स्वकर्तृकरणक
पानकर्मजल संबंधित्वेन पात्रं प्रकृतं पक्वतंडुलश्चैत्र इत्यत्र पक्वास्तंडुला येनेति रीत्या स्वकर्तृकपाककर्मकतंडुलसंबंधित्वेन चैत्रं दत्तदक्षिणो द्विज इत्यत्र दत्तादक्षि
णायस्मै इति क्रमेण स्वसंप्रदानकदानकर्मकदक्षिणासंबंधित्वेन द्विजं पतितपत्रस्तरुरित्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापादानपतनाश्रयपत्रसंबंधि

त्वेन तरुं चित्रगुश्चैत्र इत्यत्र चित्रा गावो यस्येति वाक्यानुसारेण चित्राभिन्नस्वगोसंबंधित्वेन चैत्रं रक्तपटः कायइत्यत्र रक्तः पटो यत्रेति व्युत्पत्त्या रक्ताभिन्नस्ववृत्तिपटसंबंधित्वेन का
यं एवं बाणच्छिन्नकरो नर इत्यादावपि बाणेन छिन्नः करो येन यस्य वा इत्यादिविग्रहे बाणकरणकस्वकर्तृकच्छिदाकर्मकरसंबंधित्वादिना नरादिकं बहुव्रीहिर्बोधयति इति स बैत्रे
वस्वगर्भतत्तदर्थसंबंधित्वेन धर्मिणामवगमः दक्षिणपूर्वापूर्वोत्तरेत्यादिदिग्बहुव्रीहिस्थलेपि दक्षिणायाः पूर्वायाश्च यदन्तरालं इत्यादिविग्रहेण - - - - - - - त्रुटि स्वघटकस्य दक्षि
णादिपूर्वसंबंधिविदिक्त्वादिना नैऋत्यादीनां विदिशां बोधः अस्तिक्षीरा नास्तिक्षीरा गौरित्यादावप्यस्ति क्षीरं यस्या इत्यादिविग्रहेण स्ववृत्तिक्षीरसंबंधित्वादि
प्रकारेण भवादेरवगतिः इयांस्तु विशेषो यत्तत्रैकेषां मते स्त्रीत्यादिकं तिङंतमन्येषां तत्प्रतिरूपकाव्ययमिति उपदशा दश येषामिति विग्रहेण त्रिकं षष्ट्यादिविग्रहाद्गुपद
शाः शकुनय इत्यादौ स्वसमीपगविंशत्यादिसंबंधित्वेन नवानामेकादशानां वा पक्षिणामवगमस्तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्याप्तसंख्यासमीपगविंशतिसंबंधित्वेन
नवाद बोध्यत इति तु दुर्गप्रतयः अधिका दश येषामित्यादिविग्रहेऽधिकदशाः पुरुषा इत्यादावपि स्वपर्याप्तसंख्याधिकदशत्वनिरूपितसंख्यापर्याप्त्यधिकरणसंबंधित्वेन नवादिपु
रुषप्रत्ययः द्वौ त्रयो वा येषामित्यन्यतरार्थकवाशब्देन विग्रहे द्वित्राः पवित्राः परं इत्यादौ द्वित्र्यन्यतरपर्याप्तस्वपर्याप्तसंख्यासंबंधित्वेन द्वयोस्त्रयाणां वा पवित्राणां बोधः पंच
षा घटत्वमित्याद्यनुरोधेन वाक्यस्यान्यतरार्थकतया व्युत्पाद्यत्वात् तस्य च वक्तोगतार्थत्वात् इति पंच षड्वा येषामित्यादिविग्रहे पंचषाः पुरुषा इत्यादावपि उक्तरीत्या वा
न्वयबोध इत्यन्ये परंतु द्वौ वा त्रयो वा येषामित्यादिविग्रहे वाशब्दस्य संशयकोट्यर्थतया द्वित्रा इत्यादिबहुव्रीहेः स्वधर्मिकसंशयकोटिता पन्नद्वित्रिसंबंधित्वेन द्वि
त्रिप्रभृतीनां बोधकत्वमित्याहुः द्विस्त्रयो येषामिति विग्रहे तु द्विशब्दस्य द्विगुणितत्रिपर्याप्तस्वसंख्यासंबंधित्वेन द्वित्रा इत्यादौ षण्णामवगमः सुजंतभीव येवा विग्रह
स्य व्युत्पन्नत्वाच्च पंच कृत्वो दश येषामित्यर्थे पंचदशा इत्यादिको न समासः सर्वत्रैव बहुव्रीहौ राजादित्वात् अतिचरमस्वरादेर्लोपः स्वधनसंबंधी चैत्र इत्यादौ स्वधन
स्य संबंधीति व्युत्पत्त्या स्वगर्भार्थस्य संबंधित्वेन चैत्रं बोधयन्नपि तत्पुरुषो न स्वांशस्य निरूढलक्षणया प्रत्यायकपदेन घटितत्वाभावात् आधुनिकलक्षणाया स्वपटबोधके
नपटपदेन गर्भितो पटसंबंधीत्यादिरपि मातृभक्त इत्यादिकस्तु तत्पुरुषः स्वमातृत्वेनानिरूढलक्षणाया बोधकेनाविशेषितोपि न तत्संबंधित्वेनैव पुरुषस्य निरूढत्वम्
नीत्रयो वा मुनयो यस्येति व्युत्पत्त्या न तत्तादर्थक षष्ठ्या विग्रहे स्वघटकमुनित्र्यादिसंबंधित्वेन बोधके द्विमुनि त्रिमुनि वा व्याकरणमित्यादौ द्विमुन्याद्यव्ययीभावे स्वमातृसंबंधि
त्वेन बोधके मातृसंबंधीत्यादि न तत्पुरुषे चातिव्याप्तिस्तदन्यत्वेनापि विशेषणीयत्वात् इदमत्रावधातव्यं चित्रगुरस्तीत्यादौ चित्राभिन्नस्वगोसंबंधित्वादिकं नाप्रसिद्धतुला
दृशार्थतात्पर्यग्राहकं लक्षणायां निरूढत्वसंपादकं चेति वाच्यं चित्रपदस्य प्रथमांतत्वाभावेन तदर्थे इतित्वस्यान्वयबोधानुपपत्तेः प्रथमांतपदोपस्थाप्यस्यैव भावना

श॰प्र॰ विशेष्यत्वात्॥ अन्यथाराजपुरुषोस्तीत्यादावपि राजन्यास्तित्वान्वयप्रसंगात् प्रकृत्यर्थस्वरूपः संख्याबोधकत्वव्युत्पत्तेः गोपदोत्तरप्रथमयाचित्रपदोपस्थाप्ये चित्राभिन्न
स्वगोसंबंधिन्येकत्वबोधनायोग्यत्वाच्च यत्तु गोपदमेवतादृशगोसंबंधिलक्षकं चित्रपदं तु तत्रतात्पर्यग्राहकमिति मणिकाराद्युक्तं तन्नयुक्तं पूर्वपदार्थसाकांक्षस्य
२६ वस्वार्थस्योपसर्जनतायां गोपदकस्वविधानात् चित्रपदार्थेन समं तदर्थस्यानन्वये तदनुपपत्तेरन्यथा गौरस्तीत्यादावपि चित्राभिन्नगोसंबंधित्वेन गोपदस्य लक्षणा
यामुक्तत्वापत्तेः [red] नरवर्त्ति गोपदस्य स्वार्थोपसर्जनतायां कस्वविधिर्यत्र गोपदेन लक्षणयोपस्थापिते चित्राभिन्नस्वगोसंबंधिनि अभेदेन चित्रपदार्थ
स्यान्वयः तत्र चित्रगावोस्तीत्यादि कर्मधारयेपि गोपदस्य कस्वप्रसंगात् वस्तुतः कृतपाकश्चैत्र इत्यादौ स्वकृतिविषयपाकसंबंधित्वादिना चैत्राद्यवगमः पूर्वप
दस्य परपदस्य वा लक्षणायामसंभवदुक्तिकत्वयोरनुभवेन भाक्तत्वायोगात् नच तत्र कादिवर्णस्य चैत्रादिप्रत्ययस्य वा स्वकृतिविषयपाकसंबंधिनि लक्षणा
तोन्नीरूपत्वसंपादकत्वशक्त्यांतरमिति सांप्रतं कृतादिपदेभ्यः स्वार्थानुपस्थितावपि तदन्वयबोधप्रसंगात् घटादिमात्रस्य नामत्वाभावेन तन्मात्रोपस्थाप्यार्थे स्वब
र्थान्वयायोगात् प्रकृत्यर्थावच्छिन्नस्यैव सुबर्थस्य पदार्थांतरे ऽन्वयबुद्धौ व्युत्पन्नत्वाच्च तस्मात् चित्रगुरित्यत्र गोपदं स्वगोसंबंधिनि लक्षकं तदेकदेशे च गवि ता
दात्म्येन चित्रपदार्थस्यान्वयः न च गोधर्मिकान्वयबुद्धौ तद्धर्मिकत्वानिश्चानहेतुत्वात् पदार्थैकदेशे गवि चित्रस्यान्वयो दुर्घट श्चित्रव्रजोऽस्तीत्यादौ गोरुत्थानरू
पस्य व्रजस्यैकदेशे गवि चित्रस्यानन्वयेन तादृशव्युत्पत्ते रावश्यकत्वात् इति वाच्यं घटशून्यं चैत्र — त्यादि तत्पुरुषभेदेनैव चित्रगुरित्यादि बहुव्रीहावप्यभेदेन
पदार्थैकदेशधर्मिकान्वयबोधस्य व्युत्पन्नत्वे विरोधासंभवात् फलानुरोधित्वात् कल्पनायाः प्राचीनैरपि सुंदरराजपुरुष इत्यादावभेदेन सुंदरादेः पदार्थैकदेशरा
जन्यन्वयबुद्धेः स्वीकाराच्च। चित्रापदं चित्रास्वामिपरं गोस्वामिपरं तयोरभेदान्वयः चित्रगोपदाभ्यां च एकस्याएव व्यक्ते र्भानं व्यक्तिवचनानां सन्निहिततया
भिति वृन्या भ्रमादि इति तु न युक्तं अननुभवात् कर्मधारयत्वप्रसंगात् शोभनचित्रगुरित्यादावसंभवात् घटत्वरूपमित्यादौ घटत्वपदस्य घटत्वसंबंधिपरतया रूपप
दस्य रूपसंबंधिपरतया बहुव्रीहित्वप्रसंगाच्च यत्तु गोपदं तत्र स्वकीयगोत्वेन गोसंबंधित्वेन च लक्षकं अतश्चित्रस्य गोपदार्थ एव स्वकीयगवि तस्य च सं २६
बंधिन्यन्वयान्न गोपदार्थैकदेशत्वमेकपदार्थयोश्चामिथोन्वयः कृतिवर्तमानत्वयोरिव नाव्युत्पन्नत्वमिति तन्मंदं तथा सति चित्रगुः पुरुष स्तस्याः संबंधो गति
मनोहर इत्यादौ तदादेः स्वकीयगवादिपरामर्शकत्वापत्तेः पदार्थैकदेशस्यैव परामर्शकतायास्तदादावव्युत्पन्नत्वात् इति एव चारूढवानरो वृक्ष इत्यादा
वपि रुहधातुना स्वकर्मकारोहणस्य लक्षेन कर्त्तृवानरपदेन च वानरसंबंधिन उपस्थापनादभीष्टाकांक्षादिधीसाचिव्यात् वृक्षकर्मकारोहणकर्त्तृभि॰

६ गोपदं ६

न्नवानरसंबंधित्वादिना वृक्षादेर्बोध इत्यास्तां विस्तरः ननु आरूढो वानरो यस्य वृक्षमित्यादि विग्रहादारूढपदं स्वकीयवृक्षारूढवानरसंबंधित्वेन ग्रामादिबोधवद्बहुव्रीहिः
स्यात्तस्मात्तादृशवाक्यस्य बहुव्रीहित्वं खंडयन्नाह अस्येकप्रथमांतसमस्तसुबंतैरितरैः सह पदाभेदसुबंतेन साकांक्षनामाविग्रहः अस्य बहुव्रीहे र्घटकमेकना
मप्रथमांतसमस्तसुबंतैरितर — नामाभिः सहभेदार्थकसुबंतपदद्वेन साकांक्षं विग्रहः कथ्यते न चोक्तवाक्ये तथा सुबंतस्यापि यद — त्र वृक्षादिपदेनैव साकांक्षत्वा
त् आरूढो वानरो यस्य इत्यादौ यच्छब्देन भेदार्थकसुबंत इति न तादृशस्यापि वाक्यार्थे बहुव्रीहिः पतितस्य धनं यस्य दंडो घटो यस्मादित्यादिकं तु समानार्थकसुबंतघ
टीमंत प्रायेन विग्रहः संप्रदायविरोधात् एवं घटेन पटो यत्रेत्यादिकः सहाद्यर्थमंतर्भाव्यापि सुबंतेरितितु संभवाभिप्रायं तेनाघटो देश इत्यादौ बहुव्रीहेर्न घटो
यत्रेत्यादिविग्रहे नञादेः सुबंतत्वाभावेपि नाव्याप्तिः सपुत्र इत्यादौ तु सहपुत्रो यये नेत्यादिरेव विग्रहो न तु पुत्रेण सह कृत इत्यादिरन्यपदार्थाप्राप्तेः सघटो देश इ
त्यादौ च सह घटो येनेत्यादि विग्रहे सहार्थो वैशिष्ट्यं न तु सामानाधिकरण्यं घटे देशस्य तद्व्याघातात् जीवत्पितृक इत्यादौ तु जीवन् पिता यस्येति विग्रहो यस्य
पिता जीवति तस्यैव जीवत्पितृपेयकान्वयनिराकांक्षोपि जीवदभिन्नः पिता यदीय इत्यन्वय एव साकांक्षः इदं तु बोध्यं ॥ यत्र विग्रहवाक्ये सुबंतपदं क्रियासाकांक्षं
संभवतत्तदर्थान्वित क्रियागर्भितएवार्थे विनावाधकं बहुव्रीहिर्व्युत्पन्नस्तेन गंतव्यो ग्रामो यस्येति विग्रहे गंतव्यग्रामकश्चैत्र इत्यादि विग्रहे स्वकर्तृकगतिकर्मकग्राम
संबंधित्वेनैव चैत्रादेरौत्सर्गिको बोधः कदाचित्तु तात्पर्यादिवशात् कर्तव्याभिन्नस्वकीयग्रामसंबंधित्वेन यत्र तु न पदं तत्साकांक्षत्वसंभवस्तत्र [stain] व्यासहेयन्ना
मार्थमुख्यविशेष्यको विग्रहवाक्याद्बोधः सुबंतपदार्थान्वित तन्नामार्थगर्भितएवार्थे अतएव धनी दासो यस्य इत्यर्थे यदीयधनवान्दास [stain] निदासकोय
मित्यादितो नावगमः किंतु धनवत्त्वदाससंबंधिन एव चंद्रश्चूडायां यस्येत्यादिकस्य विग्रहो न यदीय चंद्रश्चूडायामित्यर्थकः किंतु यदीय चूडायां चंद्र इत्यर्थकस्ता
दृशार्थ एव सप्तम्यंतेन चूडादे र्विशेषतो बहुव्रीहिविधानात्तेन चंद्रचूडः शिव इत्यादौ स्वचूडायां निचंद्रसंबंधित्वेनैव शिवस्यावगमो न तु चूडावति स्वकीयचंद्रसंबं
धित्वेन तत्र गगनादेर्बोधः स्वसंबंधिकपदार्थविशेषण त्वस्य केन तु सुबंतपदार्थान्वितेन तादृशपदस्यार्थेन गर्भितेपि अतएव चैत्रस्य पुत्रकृतोत्कर्ष इत्यादौ स्वपुत्रकृ
तोत्कर्षवानेव चैत्रादिः प्रतीयते ननु अन्यदीयपुत्रकृतोत्कर्षाश्रयः बहुव्रीहिं विभजते तदन्तद्गुणसंविज्ञानो द्वौ भेदौ हि तद्यादिमः विग्रहस्याविशेष्याय
त्वाद्विशेष्यकबोधकृत् तद्गुणसंविज्ञानो ऽतद्गुणसंविज्ञानश्च बहुव्रीहे र्द्वौ भेदौ तत्र विग्रहवाक्यस्थाविशेष्यविधया प्रसप्तम्यो र्थस्तद्विशेषकबोधकृत् बहु
व्रीहिस्त्वयोरादिमस्तद्गुणसंविज्ञानस्तस्य स्वार्थगुणीभूतस्य समस्यमानविशेष्यविधया विज्ञानं यस्मादिति व्युत्पत्त्या समस्तांत्यमसंग्रहकत्वात् तद्भिन्नश्चात

श.प्र. द्गुणसंविज्ञानश्चरमदूसर्थाद्गम्यते घटस्वरूपपदार्थ इत्यादितो घट: स्वरूपं यस्येति विग्रहे स्वके स्वस्वरूपाभिन्नघटसंबंधित्वेन घटाभिन्नस्वस्वरूपसंबंधित्वेन वा विग्रहे विशेष्यं
कलशमेव विशेष्यविधया बुध्यते घटस्य स्वरूपं यस्मादिति विग्रहस्य यद्यपि शेषेण ततोन्यदेव स्वजन्यस्वरूपाभिन्नघटसंबंधित्वेन कुटादिर्गुण इत्यादिरपि कुट आदिर्यस्येति वृ
त्या कुटादिभिन्नस्य स्वधर्मिकावच्छेदकधर्मिणा: संबंधित्वेन ध्वाहतरमिव कुटमपि बोधयं स्तद्गुणसंविज्ञान एव बहुव्रीहि: प्राचांमते अतद्गुणसंविज्ञाने न बहुव्रीहिमन्य
थानिवेति स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने अनुकूलो बहुव्रीहि: सतयोरथ्यवादिम: यो बहुव्रीहि: स्वार्थस्यान्वयिनि स्वार्थघटकस्यापि अर्थस्यान्वय
बोधने समर्थ: सतयोस्तद्गुणसंविज्ञानयोरादिम: लंबकर्णमानय हारग्रीवपश्येत्यादौ हि बहुव्रीहेर्लंबकर्णसंबंधिन: स्वग्रीवावृत्ति हारसंबंधिनश्च स्वार्थस्यान्वयि
निकर्मत्वादौ स्वार्थघटकीभूतस्य तादृशकर्णहारादेरपि व्युत्पत्तिवैचित्र्येणान्वयबोधने समर्थ इत्येवं विध एव तद्गुणसंविज्ञानस्तद्भिन्न एव बाधात् अतद्गुणसंवि
ज्ञानो यथा दृष्टसागरमानयेत्यादौ इति प्राचांमतं व्युत्पत्तिवैशद्यार्थमन्यथापि पुनर्विभजते स्वोक्तानि पि द्वित्र्यादि नामभिर्विग्रहास्तु न: बहुव्रीहिर्बहुविधो हि
पदत्रिपदादिक: द्वित्रिचतुरादिभिरेव स्वघटकनामभिर्विग्रहकरणात् द्विपदत्रिपदचतुष्पदादिको बहुव्रीहिर्बोध्य: चित्रागौर्यस्येति विग्रहात् चित्रगुरित्यादौ
द्विपदस्यैव जरती चित्रा गौर्यस्य महन्नीलमुसलं यत्रेत्यादिविग्रहात् जरतीचित्रगुश्चैत्रमहन्नीलोसलकाससीदित्यादौ त्रिपदस्यापि बहुव्रीहेरावश्यकत्वात् जरतीचित्र
गवीयस्यै महन्नीलोसलं यत्रेति द्विपदविग्रहे जरती शब्दे पुंवद्भावस्य महच्छब्दे चाकारस्य प्रसंगादुत्तरपदतयो विधानात् समासांतपदस्य चोत्तरपदत्वादेकत्रपुन्यापि
न गविचित्रजरतोरभेदानुभवस्य उक्तरीत्या संपादयितुमशक्यत्वेन तदर्थमेव त्रिपदादिबहुव्रीहेरावश्यकत्वाच्च द्वंद्वं लक्षयति यथार्थकयन्नामद्वयोपायघस्तकारक बोधे
समर्थ: स द्वंद्व: समासस्तावदर्थक: यद्यदर्थोपस्थापकस्य क्रमिकयादृशनामतो मस्य निश्चय: तदर्थप्रकारकान्वयबोधं प्रति तत्त्वेन समर्थ: तादृशनामानिवहृ एव
तावदर्थको द्वंद्व समास: पाणिपादं वादय धवखदिरौ छिंधि इत्यादौ कर्मत्वाद्यंशे करचरणादिप्रकारकान्वयबोधंप्रति क्रमादिधर्मिक: करचरणाद्युपस्थापक
स्य पाणिपादादिक्रमिकनामतो मस्याव्यवहितोत्तरत्वसंबंधेन निश्चय: कारणं मत: पाणिपादादिसमुदाय: करचरणादितत्तदर्थो द्वंद्व: यत्तु पाणिपादमि
त्यादौ समाहारद्वंद्वे सर्वत्रोत्तरपदे पाणिपादादि साहित्ये लक्षणा अतएव नित्यं तत्रैकवचनं समाहारस्यैकत्वात् पदांतरत्व तादृशलक्षणाया निरूढत्वसंपादकं तयापि
धवखदिरस्य स्वाश्रयनिष्ठ साहित्यसंबंधेनैव द्वितीयार्थ कर्मत्वादौ साकांक्षत्वात् पाणिपादवादयेत्यादिर्न योग्यमिति प्रांचिरुक्तं तन्न युक्तं तुल्यवदेकक्रिया
न्वयित्व बुद्धिविशेष्यविशेष्यत्वं वा पाणिपादयो: साहित्यं तस्य च नानात्वसंभवेन तद्गतद्वित्वादिबोधार्थ समाहारद्वंद्वादपि द्विवचनाद्यापत्ते: दुरुद्धरत्वात् साहित्य

स्याद्विवकुत्वेपि समाहारद्वंद्वस्य न द्विवचनादिसाकांक्षत्वं तादृशद्विगोरिवेति चेन्नहि पाणिपादप्रभृतीनां नानात्वेपि न तदर्थकद्वंद्वस्य द्विवचनाद्याकांक्षत्वमित्येव वक्त
मुचितं कृतं साहित्यस्य कल्पना हस्त्यश्वौ मित्यादिरयोग्य तया दुर्वारत्वापाताच्च नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वेन हस्तिनामश्वानां च साहित्यस्य स्वाश्रयत्वादिसंबंधेन धना
दावन्वयायोगात् तादृशसाहित्ये धनाधेन देरभेदाविरहाच्च समाहारपरिभाषात् क्लीबलिंगत्वनियमैकवचनादिपदसंस्कारोपि योगीत्वोपपन्नानद्वंद्वस्यार्थ अवच्छेदिका ए
तेन धवखदिरा विवादा वितरेतरद्वंद्वेपि उत्तरपदे धवखदिरसाहित्याश्रये लक्षणान्यथा द्विवचनादे: प्रकृत्यर्थतावच्छेदकत्वे च पर्याप्तिसंबंधेन स्वार्थद्वित्वानुभावक
त्वानुपपत्ते: धवद्वयस्य खदिरद्वयस्य च प्रतीत्यापत्तेरिति मीमांसकानामतमप्यपास्तं तुल्यवदेकक्रियान्वयित्वं धवखदिरविशेष्यकधीविशेष्यत्वं वा धवखदिरयो: साहित्यं तच्च
न धवत्वाद्यादेरितिवाच्यम् तादृशसाहित्यान्वयस्यानुभवेनास्पर्शात् तस्माद्यत्र नानाधर्माणां प्रकृत्यर्थतावच्छेदकत्वं तत्र तत्तद्धर्मावच्छिन्ने समुदित एव पर्याप्तिसंबंधे
न द्वित्वादिबोधने द्विवचनादिकं साकांक्षं न तु तादृशैकधर्मावच्छिन्ने परिसद्य तथाविधापरधर्मावच्छिन्ने यतो धवखदिरावित्यादितो धवयो: खदिरयोश्च बोधप्रसं
गइतित्वं घटघटेत्यादिकस्य घटकलशेत्यादिकस्य घटत्कुटेत्यादिकस्य क्रमिकनामत्तो मस्य निश्चयत्वेन घटादेरन्वयबोधंप्रति अहेतुत्वमतो तादृङ्नामनिवहो
घटाद्यर्थद्वंद्व: अतएव समस्यमानपदार्थयोस्तावच्छेदकयोर्वा यत्र मिथोभेदस्तत्रैव द्वंद्वस्य साधुत्वसूचनाय चार्थे द्वंद्व इति पाणिनि: प्राह अतएव च भेदगर्भसमु
च्चयार्थक शब्दमंतर्भाव्य धवश्चखदिरश्चेत्यादिं विग्रहमस्य प्रयुंजते वृद्धा: समुपाददते च तत्र मिथोभेद प्राप्तमर्थं चकारद्वंद्वं पीततत्सदृयोस्तादात्म्यमित्यादौ त्वसद्वा
दे: पीताद्यभिन्नत्वेपि पीतत्वतत्सदृत्वाद्यो: पदार्थतावच्छेदकयोरस्त्येव भेद: सुवर्थस्तु द्वित्वं न तु तत्र प्रकृत्यर्थेन्वेति पर्याप्तिसंबंधेन तत्सत्वे तस्य बाधात् सुवर्थद्वित्वादे
स्तादृशसंबंधेनैव प्रकृत्यर्थसाकांक्षत्वात् परंतु प्रकृत्यर्थतावच्छेदकयो: पीतत्वतत्सत्वयोरेव व्युत्पत्तिवैचित्र्यात् अतएव च घणुकारंभकसंयोगनाशो घ्य: कार्य
द्रव्यनाश इति शास्त्रस्यायोग्यत्वसंपत्तये सुवर्थैकत्वस्य कार्यद्रव्यत्वे न वयामिभिधित्सुनाचार्येणात्मनाभिप्रायमेकवचनमिति गुणाकिरणावल्यामभिहितं
अतएव श्याला: स्युर्भ्रातर: पत्न्या: स्वामिनो देवृदेवरौ इत्यत्र द्विवचनं भाद्विम्न स्वामिनो भ्रातरो देवृदेवरोभयपदवाच्या इत्यर्थ: सुपत्रत्यादि सिद्धं संगच्छते
यदि च परद्वयासत्वापि भूतले पीतपटावित्यादिक: प्रयोग: स्यात् पीतत्वपटत्वोभयाश्रयस्य तत्र सत्वात् एवं पीतघटयोरभेद इत्यादिना: शुद्धपटत्वादुरवो
धप्रसंगश्च तदर्थं सुवर्थद्वित्वस्य प्रकारत्वादित्यादि सत्प्रथमा इति तदागादाग्राम इत्यत्रत्यादाविव साधुत्वार्थमेव तत्र द्विवचनाभिहाहितवदंति विभाति विदंति

विनस्तिनामविदिसत्र विद्यासादिशब्दो नविदधातुस्तेनोपस्थापकः किंतुसत्ताद्यर्थकतादृश्यधातुस्तेनैव मृगपांडुरयोः पदार्थयोर्भेदेपि हरिणाहरिणाविसप्रयोगात्
श.प्र. समानशब्दयोर्द्वंद्वसत्त्वेकशेषोत्त्वसत्तिसिद्धत्वेन हरिणाविसत्रलुप्तश्चैताभ्यामेव हरिणपदाभ्यामुपस्थितयोर्मृगपांडुरयोर्बोधः हरीनमस्याविसत्रापि तुल्यकारी
सेवहरिपदाभ्यां विष्णुचंद्रयोरवगमः अन्यथा हरिहरीनमस्योरितिसप्रयोगापत्तेः हरीश्चहरयश्चेति विग्रहेतु एकेयत्रहरयस्यहसादितः समस्यमानपदार्थानां
१८ अवांतरसंख्यावगमः सुतत्रतत्संख्यावच्छिन्नस्वार्थलक्षकस्य लुप्तहर्यादिपदस्यानुसंधानप्रतिसंहितमेवहर्यादिपदंतथाविधस्वार्थस्यलक्षणयाबोधकं तदन
भिसंधानेतुकृतमेव हरिपदं विष्णुहरयोः सिंहत्रयस्यचैकपालकपायाः शक्तिभ्यांसेवया नचविग्रहस्यसुबर्थस्यद्वित्वादेः समासाप्रतिपाद्यत्वनियमात्तथा
विधाद्वित्वात्रित्वानभावेपाद्वंद्वस्यैवासाधुत्वात् उक्तक्रमेणएकशेषेणयुक्तः शलाकापरिहस्यश्यामिसादौव्यभिचारेणोक्तनियमस्यास्वत्वात् एकत्वंच
एकत्वानिचेतिविग्रहेचैकत्वानीत्येकशेषस्य गुणाकिरणावल्यां आचार्यैरभिहितत्वाच्च हंसश्चहंसीचेत्यर्थे हंसहंस्याविसप्रयोगात् तत्रापिपुंसः स्त्रिया धो.
सारूप्येदृसनुशिष्टे हंसीपदस्यलोपेहंसाविसत्रलुप्तमेवहंसीपदमनुसंधाय स्त्रीपुंसबोधः तल्लोपमतान्नतस्तु हंसपदस्त्रीहंसत्वपुरुषहंसत्वा
भ्यां विभिन्नरूपाभ्यामेकस्याः शक्तेर्लक्षणायावाग्रहादेव यत्तु तत्रसैदैपदमेवलक्षणयापास्त्रीहंसीत्वेनबालकयोश्चहंसत्वेनबोधकं सुबर्थस्तु पु
स्त्वे हंसएवान्वेतिनतुहंस्यामयोग्यत्वादितिमतं तन्न तथासतिस्त्रीहंसत्वपुंहंसत्वयोः पदार्थतावच्छेदकयोर्मिथोभेदविरहेणाद्वंद्वाप्रसक्तावेक
शेषस्यदुष्कृत्वापत्तेः अन्यथा घटतद्घटाविसपिद्वंद्वप्रसंगात् हंस्योवहंसश्चेतिविग्रहेपि हंसाहंसतोहंसीद्वयहंसयोः आगतत्रीत्यावगमः दुंदुभिश्चदुंदु
भिश्चेतिविग्रहे दुंदुभीसुंदराविसत्रासपर्ययोर्बोधनस्थले पुंलिंगस्यैवदुंदुभिशब्दस्यविशेष्यतया तद्विशेषणत्वादेवसुंदरादेः पुंस्त्वं युवाचयुवतीचेत्यर्थे
युवानौ तिनाविहार्थेवाप्युक्तकारीसेवयुवतीयौवनवतोबोधः वटाहंसोलक्ष्मणासारसौ इत्यादौतु स्त्रीपुंसयोर्द्वंद्वेपिपदसारूप्यविरहान्नैकशेषः १८
ब्राह्मणश्चब्राह्मणीचेतिप्रकरणे ब्राह्मणावानयेत्यत्रापि ब्राह्मणश्चब्राह्मणीचेतिविग्रहे प्रागुक्तदिशा ब्राह्मणभार्यापत्योरवगमः एकश्चएकाचेत्यत्र एकौद्वौचेकवद्दस
त्रौ उभौचउभेचेत्यत्र उभौ त्रयश्चतिस्रश्चेत्यत्रचविग्रहे त्रयइत्यादिरेकशेषइष्यतएव ग्राम्यानेकशफेष्वतरुणेषु स्त्रीपुंसयो बहुलमतभाव्यसारू
प्यर्णद्वंद्वस्थलेतु पुंसपदवलुक् तेनमेषश्चमेषाश्चेत्यर्थे मेषाइत्यत्रापिलुप्तं बहुमेषाणांलक्षकं मेषपदंप्रतिसंदधतएव बहुमेषाणां अजामेषीणांचावग
अतो

बर्करस्तरुणं पशुः

मः एवंमहिषाश्चमहिष्यश्चेत्यर्थे महिष्यइत्यत्रापि महिषपदं बहूनांमहिषाणां मृगाश्चमृग्यश्चेत्यर्थे मृगाइत्यत्रतु मृगादेरग्राम्यत्वात् नपुंसकैकशेषे लुक् परंतुस्त्रियाः गर्दभाश्चगर्दभ्य
श्चेत्यर्थे गर्दभाइत्यत्रापि खराणामेकशफत्वात् बर्कराश्चबर्कर्यश्चेत्यर्थे बर्कराइत्यत्रापि तरुणार्थकत्वात् स्वसाचभ्राताचेत्यर्थे भ्रातरौ इत्यत्र पुत्रश्चदुहिताचेत्यर्थे पुत्रौ इत्यत्रचवि
रूपैकशेषेपि स्वसृपदं दुहितृपदंवलुप्तंप्रतिसंधायैव भ्रातृभ्रात्रोः भगिन्योः पुत्रकन्ययोश्चावगमः ज्येष्ठपुत्रदुहित्रोश्च ज्येष्ठभ्रातरमकारयेदित्यादौ कस्तु प्रयोगः परिचिंतनीयः
सचमैत्रश्चेतिविग्रहे सादिनातदन्यस्यद्वंद्वेतु किंतावित्यत्रापि लुप्तमेवादिपदमनुसंदधतएव मैत्रावगमः सचत्वंचेत्यादिविग्रहेण किंपदान्यत्यादिद्वयगर्भद्वंद्वेतु पूर्वस्यैवा
नुत्तरस्यैव वासदादेर्लुकि यद्वाभिसादावप्युक्तक्रमेणैव तदर्थयुष्मदर्थयोर्बोधः सचत्वंचेत्यत्रापि विभिन्नार्थकविग्रहे त्यदादिगणपठितापि तदादिः त्योत्तरापठितएव तन्नान्याक
सतुल्यौसौ यद्यद्विद्यौ तुभिर्मलेत्यादौतुन त्यदादिगणनिर्द्वंद्वः परं कृतद्वावयेन यथातन्नामसभूतभीतय इत्यादौ त्यदादिव्यतिरिक्तानामप्यव्ययानां स्वरूपशेषस्य अनुसत्वात् प्र
योगानुशासितत्वात् कृत्यनायाः कश्चतुचेत्यादिविग्रहेतु किमातादृशद्वंद्वेतत्तदन्यस्यैव त्यदादेर्लुकि काविहाधिकएवप्रयोगः चैत्रस्यपितरौ इत्यत्रापि विकल्पैकशेषेतु लुप्तस्यमातृपद
स्यस्मरणात् मातुरवगमः तदस्मरणेतु पितृपदे जनकशरीरत्वेनलक्षणयामातापित्रोरवगतिरितिप्राचः कौमारास्तु मातापितृद्वंद्वे मातापितृभ्यां मातरपितरावित्यभिमितिप्रयो
गद्वयादर्शनात् चैत्रपितरौ इत्यत्रनैकशेषः परंतु पुष्पदंतादिपदवत् मातृत्वपितृत्वाभ्यां विभिन्नरूपाभ्यामेकशक्तिमदेवनियतद्विवचनाकांक्षमितृपदप्रकृतसनंतरं एवंश्वश्रुश्च
श्वशुरश्चेत्यर्थे श्वशुरावित्यत्रश्वशुरपदमपिशश्रूश्वशुरत्वद्वंद्वेश्वश्रूश्वशुरौ इत्येवप्रयोगादितिप्राहुः द्वंद्वोविभज्यते द्वौभेदावस्यथाद्यानेकोसमाहारेतरेतरौ एकान्यवचनाकांक्षा
नाकांक्षाहानोपादानतश्चतौ अस्यद्वंद्वस्यद्वौभेदौ समाहारइतरेतरश्चशास्त्रसिद्धौ तत्रएकवचनान्यसुबाकांक्षाविहीनसमाहारजभाविधसुबाकांक्षश्च इतरेतरः पाणि
पादं हस्त्यश्वमित्यादौ करचरणादीनां बहूनामप्यवगतौ एकवचनमेवप्रमाणं धवखदिरावित्यादौ द्विवचनादिः परिस्कंदिस्कंदिरित्यादौ तु परिस्कंदिपर्यंतसहितः स्विदि
रिविग्रहमध्यपदलोपीकर्मधारयो यथा अव्याप्तिव्याप्तिरितिमणिग्रंथादौ उपपदसमासंलक्षयति यद्यत्तत्पदंनामानुत्तरंपदबोधकं धातुकृदुपपदसमास
सर्वतकः धातुकृत्प्रतिनिष्पन्नं कर्त्राद्यर्थककार्यादिपदं पदांतरानुत्तरं सत् नकर्त्रादेरन्वयबोधसमर्थं कुंभनिभमित्यादौतु नतत्रुचे निभादिपदं सदृशाद्यर्थेतादृशम
पिनधातुकृत्प्रत्ययनिष्पन्नमितितद्व्युदासः भवियज्जते कारकेकोपपदकः षड्विधोयमितिक्रमः कर्मकर्त्राद्युपपदभेदाद्द्व विधत्वसौ कारकेप्युत्तानीयः पूर्वोत्तर
मध्यं इत्यादावुत्तनादिः कर्ता कुंभकारः सौवीरपायीत्यादौ कर्मकरणं आश्वशीयइत्यादौ करणं उरसाहत् वर्णात्यात् बाहुभदृइत्यादौ अपादानं खशाय कुरु
चरइत्यादावधिकरणं उपपदं संप्रदानंतु नकुत्रापिदृश्यते दृश्यतेच ब्रह्मभूयमित्यादौ कारकभिन्नेनापि उपपदेनसमासइतिसावनेकविध एवनतु कारक
मात्रोपपदकत्वात् षड्विध एवन्यूनत्वाधिकत्वाभ्यां विभागव्याघातादिति असमर्थपदयोरप्युक्तसमासः परंतु असमर्थपदस्यैवनञासमस्तस्यैवत

२१ स्वस्वार्थबोधने प्रत्ययानां केवलस्य तस्याप्रयोगः यौगिकेषु कृमप्राप्तं तद्धितांतं नाम लक्षयति यन्नाम तद्धितं यच्च यत्क्रमं सद्यर्थकं तद्यंतं क्रमं तत्र तद्धितांतं
निगद्यते यथा उपगुनाम्नो नर तद्धितत्वं तद्धितोत्तरनाम सुवाप्रत्ययेक बहुगु डाक्षिसादौ दाक्षिरित्यादौ वा व्यापकमेव तत्र तद्धितांतं नाम्नि तथाविधा यादृशं नामयस्यातद्धि
१८ ते यादृशानुपूर्व्यवच्छिन्नं सत् यादृशार्थस्यान्वयबोधे समर्थं तादृशानुपूर्व्येव च्छिन्नं तद्द्वयमपि तादृशार्थे तद्धितांतं नाम यथा: पचतितमामित्यादिकं तु नाम वन प्रागेव
तद्धितांतं तस्यापि लक्ष्यत्वे तु यः शब्दस्तद्धितं पठ्यते इति पठनीयं गवादेरपि तद्धितलोपगमात् अजाबाल्मीकिलादेर्ना संग्रहः इति दिति कृदंतं नाम लक्षयति यद्धात्वर्थान्वि
तस्वार्थीकृत कृधादिशं भवेत् तद्धात्वंतरगंतत्कृत् कृदंतं नाम तादृशो यद्धात्वर्थान्वितस्वार्थान्वयबोधं प्रति यादृशानुपूर्व्यवच्छिन्नस्य यत्कृतो निश्चयः कारकं
तद्धात्वंतरगं कृदेव तादृशानुपूर्व्यवच्छिन्नं सत् कृदंतं नाम यथा पाचकपच्यमानादि तद्धि धात्वर्थेनान्वितस्य स्वार्थकृत्वादेः कर्मत्वादावन्वयबोधं प्रति द्वितीया
दावो आनुपूर्वीमिलितेनानिश्चीयमानहेतुः चैत्रो ग्रामं गंतव्यमित्यादौ धात्वर्थे स्वार्थमित्यसाधनत्वादिकं बोधयदपि तव्यादिकं धात्वर्थनिष्ठविषयतानिरू
पितस्वार्थविषयताकबोधजनकत्वेन धात्वर्थान्वितस्वार्थबोधकमेव भावकृतामपि त्वरूपार्थकत्वव्युत्पादितमेव तदेवं रूढयोगाद्यर्थभेदेन नाम्नश्चातु
विध्यमुक्तं संप्रति शब्दसंस्कारानुगुणलिंगभेदेन त्रैविध्यमप्याह स्त्रीलिंगमपि पुंल्लिंगं क्लीबालिंगमिति त्रिधा शब्दसंस्कारसिद्ध्यर्थं भाष्यमानामि
भिधत्ते स्त्रीलिंगं पुल्लिंगं नपुंसकमित्यत्रापि त्रिधा नाम अभिधीयते तत्र स्त्रीलिंगत्वादिकं न स्त्रीत्वादिवाचकत्वं तटस्तटी तटमित्यादौ प्रकृत्यर्थस्य तटादेः स्त्रीत्वाद्यव
गतेः अयोग्यतापत्तेः परंतु स्त्रीलिंगत्वादिना परिभाषितत्वमात्रं परिभाषायाः प्रयोजनं चेह पदसंस्कारः सोपि न दृसादौ पुंस्त्वेनार्थे सुबादिसद्भावस्त
टीयादौ स्त्रीत्वेन ङीबादिप्रत्ययस्तटमित्यादौ क्लीबत्वेन सुबादेर्लुगादिरिति दुन्दुभिः सुवर्ण इत्यादौ तु शब्दसंस्कारस्यैव फलमर्थविशेषलाभो न द्वयं दुन्दुभि
रिदं सुवर्णं इत्यादितो द्वयस्याशीतिरात्तिकमित्तः सुवर्णादेश्चावगमः यत्र च सर्वपदादिशब्दे स्त्रीलिंगत्वादिप्रयुक्तो नास्ति संस्कारस्य विशेषस्तत्रापि फलोदेन
त्वाकांक्षेशोभनादिपदे एवास्ति विशेषणपदानां विशेष्यपदलिंगग्राहित्वस्य विनाबाधकं नियमात् यत्तु तटादिकं द्रव्यमिव तद्गतं स्त्रीत्वादिकं पदा १८
र्थांतरमपि तटादिपदस्यार्थः प्रत्ययानां तु न द्योतकतामात्रमिति वैय्याकरणैरुक्तं तन्न युक्तं तटादिपदेभ्यस्तटत्वादिनैव धर्मांतरेणास्त्रीत्वादिना तटादेरनुभ
वेन तादृशपदार्थांतरे प्रमाणाभावात् न विप्रावेदमुश्चेरदित्याय दोचटादिना प्रत्ययेनैव स्वार्थस्य योन्यादिमदुपलक्षणस्त्रीत्वस्य प्रकृत्यर्थे तु भवनात्
न प्राणिप्राप्त्या प्रथ्ये न विप्रोध्ययनं त्यजेत् इत्यादावपि लुप्तालिंगाभ्यां स्त्रीत्वमेव उपस्थितं विलक्षणसंस्कारार्थं नपुंसकत्वे प्राणिनि पुंस्त्वं च विप्र

त्वभ्यसते न चैवं दधिपरं इतीत्यादौ कर्मत्वादेरनुभवार्थतस्यापि प्रकृत्यर्थता किं न स्यात् स्यादेवेति चेत् संख्याया अपि स्यादिति किं न रोचयेत् रोचयेत् दपि प्रत्यया
नां तदर्थव्यंजकतामात्रत्वादिति तु रिक्तं वचः प्रत्ययानामन्वयव्यतिरेकाभ्यां संख्यादिवाचकत्वव्यवस्थितेरन्यथा प्रत्ययानामेव तत्तद्विशिष्टार्थबोधकतायां
प्रकृतीनामभिव्यंजकतामात्रस्य सुवचत्वात् अत एव न प्राणिप्राप्त्या द्युत्यमित्यादौ प्राण्यादिमात्रबोधकस्य प्राण्यादिपदस्यैव लक्षणया नपुंसकप्राण्या
दिपरत्वे सातिविस्तरः फणिभाष्याधुक्तं नाम्नः पंचविधत्वमुपपादयति एकैकेन तथा द्वाभ्यां वचनैस्त्रिभिरेव च साकांक्षत्वप्रयुक्तं तु नाम पंचविधं स्मृतं सुपां
मध्ये एकवचनमात्रसाकांक्षत्वेन द्विवचनमात्रसाकांक्षत्वेन बहुवचनमात्रसाकांक्षत्वेन द्विवचनानिराकांक्षत्वेन वचनत्रयसाकांक्षत्वेन च नाम्नः पंचविधत्वमप
देशः एकादिकं विंशत्यादिकं स्वार्थकभाव कृदंतं भूयमानं भवितव्यादिकं क्रियाविशेषणार्थकं समाहारद्विगुद्वंद्वान्योन्यपरस्परादिकं च सुपामेकवच
नमात्रेण साकांक्षं भवितव्यानां भवंति दारा इत्यादौ तु भवितव्यानामित्यस्य प्राप्तव्यानामित्यर्थः उभयपदं द्विपदं पुष्पदंतपदं स्त्रैवैधेभिन्नादिपदं भास्वरगयो
रित्यादिपदं ग्रामे गोदपदं द्विवचनमात्रेण प्राणप्रभृतिकं त्रिचतुरादिकं कतिपदं बहुवचनेनैव उभयमेकवचनबहुवचनाभ्यामेव घटपटादिकं तु त्रि
भिरपि वचनैर्यथा चैतन्नाथाग्रे प्रतिपादयिष्यामः नामधातुभेदात् प्रकृतेर्द्वैविध्यमुक्तं तत्र सामान्यतो विशेषतश्च नाम निरुक्त्या वसरसंगत्या धातुं
निरूपयति यो यत्स्वार्थस्येतरत्र तदर्थबोधनक्षमः स तादृशार्थकः शब्दो धातुस्त्रिविधईरितः यः शब्दस्तोनरतच्च शक्यार्थस्योपस्थाप्यस्यया
दृशार्थान्वयबोधं प्रति समर्थः स तादृशार्थे धातुरुच्यते पचति पपाठ प्रभृतयो हि शब्दाः पत्के पिपक्षित्यादिना मनिविष्टाः स्वोत्तरतदर्थकर्त्रादौ स्वोप
स्थाप्यानां पचनपाकेच्छादीनामन्वयधियं प्रति प्रभवानत्वन्ये घटादयः स चायं मूलधातुः सौत्रः प्रत्ययांतश्चेति त्रिविधः स्वबर्थ्यविधात्वर्थस्यान्वयवा
दिनामते न धातुं लक्षयति यः स्वबर्थे निजार्थस्य स्वोत्तरकृत्त्विं तनं विना यादृशस्यान्यथाहेतुः स वा धातुस्तदर्थकः यः शब्दः स्वोत्तरकृत्त्विं तनं विना सुब
र्थे यादृशस्य निजार्थस्यान्वयधियं प्रत्यसमर्थः स एव तादृशार्थको धातुः पाकं कुरु संपद पश्येत्यादौ क्विपचादिको धातुः स्वोत्तरसुभावकृत प्रति
संधानदशायामेव सुबर्थकर्मत्वादौ स्वार्थस्य पचनादेरन्वयबोधमाधत्ते नान्यथा स्वरूपस्य घटादेः शक्यत्वेन तत्रधात्वर्थस्यान्वयायोगादिति प्रो
चेः धातोर्विधात्वं लक्षयति मूलधातुर्गणेनोक्तः सौत्रः सूत्रैकदर्शितः योगलभ्यार्थको धातुः प्रत्ययांतः प्रकीर्तितः गणे कोगणपठितः सौत्रः सूत्र
मात्रपाठः स्कभुस्तुप्रभृतिकः योगलभ्यार्थकः स्वाश्रयवलक्ष्यार्थस्य बोधकः पाचिपिपासादिति तिक्षादिरपि सनर्थस्वरूपाद्यंतर्भावेणायोगि

१ श्रा.प्र. कएव हिंदोलो दोलनादेलौ किंकस्यापि सत्वाद्द्वौ द्विविध एव धातुरिति बोपदेवः सौत्रपदं योगिकप्रयोगः कथामन्यपरमतो लौकिकस्यनाधिक्यमित्यन्ये परस्मै
पदितादिभेदेना पित्रैविध्यं संभवसात स्वदपि नवैति योयस्वार्थकर्तृत्वेयादृकस्वार्थस्यबोधकः सतसदीभवेद्वृत्तस्वार्थस्वार्थबोधने योधातुः स्वोपस्थाप्य
२० स्पयादृशार्थस्य यसदोपस्थाप्येकर्तृहे न्वयबोधंप्रतिसमर्थः सधातु स्तत्पदी गमभूप्रभृतयः स्वार्थस्यगस्य सत्तिप्रभृते भुरखेप्रयोगेण वा परकर्मपदार्थएवकर्तृ
तेन यबोधंप्रतिप्रभवः सहापि योग्यत्वादित्यादे चैत्रोग छतिभवति त्यादितेकर्तृव गच्छतीभवते प्रभृतिप्रयोगतिकर्तृत्वाद्यप्रतीतेः संगच्छते पचते इत्यादिनस
गतिप्राप्ति त्यादिकर्तृत्वावगमात्तादृशार्थन्तु आत्मनेपदिन एव ते यजतिकरोती त्यादितद्वयजते कुरुतेदृत्यादितोपियागादिकर्तृत्वस्यावगतेः यागाद्यर्थेय
ञ्निकृञादिरुभयपदी तदुक्तमभियुक्तैः पदद्वयेन साकांक्षा स्वरितञित्ण्यन्तधातवः सन्नन्ताश्चार्थशेषमूलधातुवत्पदिनोमताः कृञ्ड-यइता ङानुबंधास
च्चाद्या आत्मनेपदे परस्मैपदिनो निरंकर्तारिधातवः स्वरितः सम्मतानुबंधाः यजपचाद्याञितो अनुबंधाः कृञसकाद्यः प्रयताश्चणिप्रत्ययः कर्तृत्ववा
चिनापदद्वयेन समं साकांक्षा सन्नन्तादयः प्रकृतिपदप्रकृतिभाजस्तेन बभूषते विवर्द्धिषतीत्यादिकोनप्रयोगः स्मृदृशो परस्मैपदिपिसन्नन्तयोस्त्वयोपत्नेति
पदिष्वमेवातङ्गतप्रत्ययकृति कपङ्ताहंसा पोः यङ्ताचोभयाद्याः अनुवंधाः सीङुनद्याः रुचादिगणश्चकर्तृत्ववाचिनात्मनेपदेनेवसाकांक्षः परेपूनः
धातवः परस्मैपदेनैवेस्पर्थः प्रत्ययोसौ चतुर्विधइति यदुक्तं तस्यचतस्रोविधादर्शयति विभक्तिश्चैवधात्वंशस्तद्धितकृदितिक्रमात् चतुर्धा प्रत्ययाः प्रो
क्ताः कादिभिः पंचधाथवा धात्वंशाः सनक्यजादिः वत्सको व्यक्त इत्यादे इमाकुत्साद्यर्थकस्यकादेः अजाब्राह्मणीत्यक्री इत्यादेः स्त्रीत्वाद्यर्थकष्टावादेश्च
तद्धितत्वोपगमे चतुर्विधएवप्रत्ययः तदनुपगमे तु पंचविधएवातएवाश्वकभार्य इत्यादेः पुंवद्भावस्तद्धितकृतोरेवकोपधस्य तन्निषेधादेवमोपगवइत्यादे
इवपद्गोत्वादेनौत्वादीतिकालापाः प्रत्ययेषु विभक्तिं लक्ष्यति विभज्यतेच संख्याव्याप्यसामान्येः शक्तिमानप्रत्ययस्तु सैषः साविभक्ति र्द्विधाप्रोक्ता २०
सुप्चातिङ् चेतिभेदतः संख्यावान्तरजातसवच्छिन्नशक्तिमान्यः प्रत्ययः साविभक्तिः सुप्तिङ् चेतिभेदतो द्विधा एकत्वाद्यवच्छिन्नशक्तिमानपितदा
दिर्नप्रत्ययः प्रत्ययश्च तज्ज्ञादिर्नसंख्याशक्त इति तयोर्व्युदासः यदाख्यातमात्रस्यतदेकवचनस्यवानसंख्याशक्तेप्रमाणं तदान्यथानिर्वक्ति प्रकृ
त्यर्थस्यस्वार्थविधेयत्वेनबोधने समर्थः सोथवाशब्दो विभक्तिरितिनगीयते यः शब्दः स्वार्थधर्मिणि स्वप्रकृत्यर्थविधेयकान्वयबोधंप्रतिसमर्थः सवा-
विभक्तिरित्युच्यते घटमित्यादेः सुपाकर्मत्वं घटीयमित्यादेरिवपचतीत्यादेः तिङापिकृतिः पाकीयादित्यादेरुद्देश्यविधेयभावेन स्वार्थप्रकृत्यर्थ

धीरुत्पद्यते नतु प्रत्ययान्तरेण तस्यप्रकृत्यर्थावच्छिन्नस्वार्थविषयताशालित्येव शाब्दे समर्थत्वात् नहिघटस्यत्यादितोपलं दक्षस्येत्यादिरुद्देश्यविधेयभावेनबोधः कि
स्त्वापि किंतु दक्षापत्यत्वावच्छिन्नेधर्मिणि एव सुबर्थेकत्वादेः अन्यथापसंदक्षस्य चैत्रस्य चेत्यादाविव दाक्षिश्चैत्रस्येत्यावप्यपत्यादिधर्मिकस्य दक्षचैत्राभेदः
विधेयभावेन कुतः दन्वयस्य दुर्वारत्वापत्तेः प्रथमाप्यभेदादेः स्वार्थप्रकृत्यर्थस्याविधेयभावेन धीजनयत्येव नत्वेदेवं नीलोघट इत्यादौ नीलाद्यभेदस्य रूपस्या
वान्तरवाक्यार्थस्य पूर्वमप्रतीतौ महावाक्यार्थबोधस्यातत्पूर्वकत्वहानापत्तिरतोन तस्यामव्याप्तिः विभक्त्यो सुपुलक्ष्यति विभज्यतेच प्रकृत्यर्थेस्वा
र्थसंख्यान्वयधीहेतवः सुपः प्रथमादिप्रभेदेन ताश्चसप्तविधामताः प्रकृत्यर्थधर्मिकस्वार्थसंख्यान्वयबोधिका विभक्तयः सुपउच्यते ताश्चप्रथ
मा द्वितीयादिभेदेन सप्तविधाः तिङस्तु स्वार्थभावनाद्यन्वयिन्येव स्वार्थसंख्यामवबोधयंति नतु स्वप्रकृत्यर्थ इति तासांव्युदासः सुप्प्रथमातत्रस्वार्थ
तादात्म्यभिन्नस्वार्थेयाप्रकृत्यर्थस्यबोधने नसमर्थाविभक्तिः साप्रथमापरिकीर्तिता याविभक्तिः स्वार्थतादात्म्याभिन्नस्वार्थधर्मिकप्रकृत्यर्थबोधंप्रतिस्वरूप
योग्यासाप्रथमा द्वितीयादयः स्वार्थकर्मत्वादौ प्रकृत्यर्थस्यान्वयबोधंप्रतिसमर्थाः प्रथमातु विशेषणपदोत्तरस्थातादृशितादात्म्येनतथान्वयबोध
सपिनतादात्म्यभिन्नतया प्रथमायाद्विवचनं औद्वितीयायाः पुनरोडितिनतत्रातिव्याप्तिशंकापीतिवदंति यदिस्वर्गकामोयजेतेत्यादौ प्रथमोपस्था
प्यस्यनियोज्यस्यपागादावाधेयत्वस्यवाविध्यर्थकृतिसाध्यत्वादिघटककृत्यादौ प्रकृत्यर्थावच्छिन्नस्यान्वयः प्रामाणिकोयदिवा पचति इत्यादेरित्या
दौ चैतूर्थ्यार्थकानेन प्रथमा परंतुप्रथमैवोद्देश्यत्वबोधिका तदातस्यामव्याप्तिरसंभवोवास्यादृतोन्यथानिर्वक्ति धात्वर्थेनविशिष्टस्यतिङर्थस्यान्व
यंप्रति यदेतनामबोध्यत्वंतत्र सुप्साधुत्वातथा धात्वर्थावच्छिन्नतिङर्थस्यान्वयबोधंप्रति यदेतनामोपस्थाप्यत्वंतत्रं तादृशीसुप्वाप्रथमा यजते
त्यादौ तिङर्थस्येष्टसाधनत्वादेर्नप्रकृत्यर्थावच्छिन्नस्ययागादावन्वयः किंतु केवलस्यातस्तस्यप्रथमांतनामानुपस्थाप्यत्वेपि नक्षतिः चैत्रमैत्रौस्तः इत्या
दौ च द्वंद्वेनैव प्रथमांतनाम्नाचैत्रस्योपस्थापनान्नव्यभिचारः द्वितीयादिविभक्तिषट्कं संक्षेपार्थमेकग्रंथेन निर्वक्ति धातुभेदानुपाद्यैव तदर्थकर्मतादि
कान्वाध्यन्त्याद्वितीयानिर्वक्ति याविभक्तयः धातुभेदानुपचाद्यान् तथाच तिब्तप्त्वधातूपस्थाप्यपाकधर्मिककर्मत्वानुभ वानुकूलस्वप्सजाती

यत्रं द्वितीयालक्षणं चौरस्य हिनस्तीत्यत्र तिबन्तधात्वर्थे कर्मत्वप्रतिपादकापि षष्ठी न पाके तण्डुलस्य पाचक इत्यादौ पाकेतादृश्यपि न तिबन्तषष्ठ्यर्थे ग्रामं गच्छती
श्र.प्र. त्यादावमादे पाकादेः कर्मत्वाद्यननुभावकत्वेपि तदनुभावकसजातीयत्वान्नाव्याप्तिः काष्ठेन पचतीत्यत्र तृतीया करणत्वस्यैव बोधिका न तु कर्मत्वस्य घटोस्त
२१ इत्यादौ द्विवचनस्योकारस्य प्रथमात्वमिव द्वितीयात्वं न न क्षतिकरं उपधेयसंकरेप्युपाधेरसांकर्यात् अङ्कुरस्यार्थमुख्यविशेष्यकान्वयबोधानर्जकत्वे सती
तिवाचकत्वं अधिकमभिहितं प्राक् पञ्चम्यर्थधर्मिककरणत्वान्वयबोधानुकूलसुप्सजातीयत्वं तृतीयात्वं शतायपरिक्रीणाति इत्यादौ धात्वर्थकरण
त्वबोधं प्रति अनुकूलापि चतुर्थी न पञ्चम्यर्थे तथा परिक्रीणः करणतायामेव तद्विधानात् काष्ठात् पचनमित्यादौ तु पञ्चमी न करणत्वस्य बोधिका ऽसाम
र्थ्यात् किंतु कारणत्वस्यैव हेतुतायां तदनुशासनात् ददात्यर्थदानधर्मिकसंप्रदानत्वानुभावकसुप्सजातीयत्वं चतुर्थीत्वं दास्यामालप्रयच्छतीत्यत्र दा
नसंप्रदानत्वस्यानुभाविकापि तृतीया न ददात्यर्थे दाणधातोर्योगएव संप्रदानतायां दाणो नाचारमेन तृतीयानुशासनात् रीतिरुक्तेवसंप्रदान
त्वप्रकारसुप्चतुर्थीतिलघुनयुक्तं संप्रदानत्वापेक्षया लघुन्येकत्वादावेव चतुर्थ्याः शक्तिमत्वाद्यनुभिन्नेमैत्रादिपदस्य निरूढलक्षणाभिप्रायत्वे
नाप्युपपत्तेः पतधात्वर्थतावच्छेदकरूपावच्छिन्नधर्मिकविभागबोधानुकूलसुप्सजातीयत्वं पञ्चमीत्वं तत्पतत्सत्सजातीयादिवस्तुगतापत्य
र्थे विभागस्य बोधिकापि द्वितीया न पतनत्वजातवच्छिन्ने तस्या एव पत्यर्थतावच्छेदकत्वात् नरकं पतित इत्यादौ भोगावच्छिन्नदुरितस्य पत्यर्थत्वेपि
द्वितीयया न तत्र विभागो नुभाव्यते परं त्वाधेयत्वं तिबन्तदाधात्वर्थधर्मिकस्वार्थान्वयबोधं प्रति स्वरूपायोग्यत्वेसति प्रथमान्यसुप्त्वं षष्ठीत्वं ध २१
नं ददाति विप्राय पात्रात् काष्ठ्यांददासैौ इत्यत्र द्वितीयादिर्ददात्यर्थे स्वार्थान्वयबोधकतया तत्स्वरूपयोग्य एवाप्रथमात्तु तदयोग्या विप्रथमैव धन
स्य दाते इत्यत्र दाने स्वार्थबोधिकापि षष्ठी न तिबन्तस्याद्याधातोरर्थे येनासंभवः हिनस्त्यर्थहिंसाधर्मिकस्वार्थकर्मत्वानुभावकसुप्सजातीयत्वं चौरं
हरतीत्यादौ हिंसायां कर्मत्वबोधिकापि द्वितीया न हिनस्त्युपस्थाप्यायां दण्डेन हिनस्तीत्यादौ तादृश्यामपि हिंसायां करणतादेरवबोधकतृतीया
दिर्न तु कर्मत्वस्य संबन्धसामान्ये स्वत्वे वा शङ्का स्पृष्टं चीग्रामं गच्छति घटं ददातीत्यादौ च धात्वर्थतावच्छेदकीभूते संयोग स्वत्वादौ द्वितीययाऽधे

यत्वमेवबोध्यते इत्यपि वदन्ति पचधात्वर्थतावच्छेदकीरूपावच्छिन्नधर्मिकस्वार्थाधेयत्वबोधानुकूलसुप्सजातीयत्वं सप्तमीत्वं शरावे सूपयोः पाके चैत्र इत्यादौ द्विवचनस्य
लक्ष्यतादितिपूर्ववत् अधिकरणत्वाधेयत्वे वा शक्तसुप्सप्तमी ग्राममध्यास्ते इत्यादावधिकरणत्वबोधयत्यपि द्वितीया न तत्र शक्ता ग्रामायगच्छतीत्यादौ कर्मत्वादिबोधिकचतुर्थ्या
दिः चैत्रधर्मिकस्वार्थाधिकरणत्वान्वयबोधकसुप्त्वमानानुपूर्वीकत्वं वा सप्तमीत्वमित्यपि वदन्ति सुबादित्रिकान्यतमत्वं प्रथमात्वमेव ममादित्रिकान्यतमत्वादिना द्वितीयादि
कं निर्वाच्यं इत्यप्याकुर्वन्ति इति कृतं विस्तरेण क्रियाकारकयोरन्वयव्युत्पत्तये यथापि सुपां विभज्यते कारकार्थेतरार्थाव सुप्विभक्तिर्विभज्यते धात्वर्थाशेषप्रकारेण स्वर्थ तैः
त्रकारकं वृक्षं कारकस्य बोधिका तदन्यपञ्चम्यन्तद्विविधोपि सुपां विभागस्तत्रयद्व्याप्तिः तत्स्थाप्यपा यादृशार्थेन्वयप्रकारीभूय भासते प तु सूत्रर्थः सततत्तूपस्थाप्य तादृश
क्रियायां कारकं वृक्षात्पततीत्याद्याद्विभेति इत्यादौ ब्राह्मणाय ददाति पुत्राय क्रुध्यतीत्यादौ दात्रेणाच्छिनत्ति घटत्वेनज्ञानातीत्यादौ स्थाल्यां पचति इत्यत्र कारकोभासते इ
त्यादौ ग्रामं गच्छति घटं पश्यतीत्यादौ चैत्रेण पच्यते घटेन भूयते इत्यादौ च पतिप्रभृतिधात्वर्थपतनादौ पञ्चम्याद्युपस्थापितो विभागादिः प्रकारीभूय भासते
इति तत्तद्रूपस्थापित तत्क्रियायां विभागादिकं प्रकृते कारकमतो धात्वर्थे स्वार्थबोधकतया तत्र सप्तमी पञ्चम्यादिः ॥ ॥ कारकविभक्तिरुच्यते यादृशेन ना
मार्थेनावच्छिन्नसुबर्थस्याद्यादृशधात्वर्थे न्वयः स एव तु तादृशधात्वर्थे कारकतया व्यपदिश्यते तेन वृक्षात्पततीत्यादौ वृक्षादेरपि पतनादिक्रियायामपादानादिकारकत्व
व्यवहारः स्तोकं पचतीत्यादौ क्रियायां प्रकारीभूतोपि स्तोकादिर्न कारकं सुपानुस्थापनात् द्वितीयात्तु क्लीबलिङ्गत्ववदनुशासनैकाच स्तोकपावक इत्यादिस्तु तत्तु
नेत्रयोगः रूपो गिरिकाणइत्यादि वद्विशेषविधेरेव षष्ठ्यर्थस्तु संबन्धो न धात्वर्थे प्रकारीभूय भासते तण्डुलस्य पचतीत्यादिप्रयोगात् अतः संबन्धो न कारकं न वा तदर्थिकापि षष्ठ्यादिः कारक
विभक्तिः अतएव क्रियाप्रकारीभूतोर्थः कारकं तत्त्व षड्विधं कर्तृकर्मादिभेदेन शेषाः संबन्धरुच्यते इति शाब्दिकाः स्मरन्ति शेषः कारकादन्यविशिष्टः संबन्धः कारकादन्य इत्यपि
पठन्ति रजकस्य वस्त्रं ददातीत्यादौ च परिष्कार्यत्वादिलक्षणः संबन्धः वस्त्रादावेव षष्ठ्या अनुभाव्यते तण्डुलपाचकश्चैत्रस्य भोक्त्व्य इत्यादौ तु कर्म कर्तृत्वादिकं कारकमेवधा
त्वर्थे पचनादौ कृद्योगे कर्तृकर्मणोः षष्ठ्यनुशिष्टेः गुरुविप्रतपस्वि दुर्गतानां प्रतिकुर्वीत भिषक् स्वैर्भेषजैः पञ्चस्या तु करोसे षकुमारिम् स्वमंत्रातः सालक्ष्मी
रूपकुरुते यथा परेषाम् मित्यादावपि मातुः स्मरति चौरस्य हिनस्ति एधस्योपकुरुते इत्यादाविवाक्रियाविशेषयोगे कारकार्थे षष्ठी प्रयोगेदृष्ट्वा प्रसन्नैरेध्यः
करोते कर्मण्यपि वैकल्पिकस्य षष्ठी विधेर्वैकल्पहात् न हि गुरून् प्रति करोतीत्यादावनुशासनास्त्वेपि सति सप्तम्याः साम्नाधिकरण्या इतएवोक्तेवाक्येप्योग

श्रा.प्र. वीरादिकर्मत्वं प्रतीकाशादिक्रियायां नावगम्यते अत एव सामान्यवत्त्वे सति बाधकाभावात् प्रसिद्धवादिदृष्टं इत्युपरि अर्थाश्चेत्तात्पर्यतो चिंतित: दंडेन घटो भूतलेऽपा
इत्यादिनसमासः कारकविभक्त्यर्थो तद्भावेऽपि च विशेषविधिं विना तत्स्वरूपस्य व्युत्पन्नत्वात् मम प्रतिभाति रोचते स्फुरतीत्यादौ प्रतिभानादिक्रियायामस्मदादे: संबं
२२ × दौ तु तृतीयाद्यर्थ: करणत्वादिकं न कारकं धात्वर्थानन्वितत्वात् अत एव तादृशकर्तृत्वो स्वार्थे दंडघटभूतलपट इत्याद्यर्थ: षष्ठ्या कार्यबोध्यतामकारकत्वादिभानप्रसंगादिति तु
विभावनीये कारकविभक्तेतो अपादानसंप्रदानकरणाधारकर्मणां कर्तुश्चापि देत: षोढाकारकं प्रतिकीर्तितं अपादानादीनां नामभेदो वै धर्मे अपादानत्वादिते
त्युक्त: कारकस्य षड्विधत्वव्यवहार: तत्रापादानं लक्षयति क्रियाधर्मिविभाग: स्वार्थ: पंचम्या विग्रहस्तथा अनुभाव्य: कारकं तदपादानत्वसंज्ञकं क्रियाधात्व
र्थस्तथा च यद्धात्वर्थप्रत्ययाद्यर्थविग्रहवाक्यस्य पंचम्यार्थ: स्वार्थोऽनुभावयितुं शक्य: स तद्धात्वर्थत्वात् तादृशक्रियायामपादानत्वमुच्यते इत्यसंगतिरिति
वधिकविभागानुकूलपतनकर्तुरन्वयबुद्धौ धातुपरत्वात् पतने पंचम्युपस्थाप्यो विभाग: स्वानुकूलत्वसंबंधेन प्रकार इति स एव तत्रापादानत्वं नेच्छत्यादिवस्तु
स्मात्पततिस्थैत्र इत्यप्रयोगात् धात्वर्थान्वितपरसमवेतत्वमपि तत्र पंचम्यर्थ इति तद्यपादानत्वं स्यात् इष्टत्वात् वस्तुत: परसमवेतत्वेन पंचम्यर्थ: तथा सति द्र
व्यान्तसमवेतस्य पतनस्यान्वयसिध्याद्रव्यान्तरतिरखगत्वादेरप्ययोग्यतापत्ते: परंतु स्वावधिकत्वसंबंधेन प्रकृत्यर्थान्वितस्य पंचम्यर्थविभागस्य सामानाधिकरण्या
नुकूलत्वोभयसंबंधेनैव धात्वर्थपतनेऽन्वयस्य व्युत्पन्नत्वान्न तादृश: प्रयोग: चैत्रावधिकत्वविशिष्टविभागस्याधिकरणानिष्ठ यच्चैत्रविभागानुकूलं पतनं तस्य चैत्रे बाधा
त् स्वावधिकत्वविशिष्टविभागस्य स्वस्मिन्नसत्वादिति युक्तमुत्पश्याम: प्रासादमारुह्य प्रेक्षते इत्यादौ अर्थतु प्रासादात्प्रेक्षते इत्यादिवाक्यं न विग्रहत्वात् गर्भे प्रासाद
प्रेक्षकादिशब्दानामसमस्तत्वात् अतस्तत्र पंचम्यर्थे आरोहणानंतर्यादौ नातिप्रसंग: अपादानशब्दस्तु तत्र कर्मो नाधिकरणत्वे सति तत्तत्कर्मजन्यविभागाश्रये २२
शक्त इति न तत्र तद्व्यवहार: तरुकर्मकत्यागएव तरुत: पतनमतस्तस्य त्यागे कर्मत्वं तदपादानत्वरूपं व सेव धात्वर्थतानवच्छेदकीभूत एव विभागे पंचम्या: साधुत्वा
त्तरोत्स्यजतीत्यादिको न प्रयोग: त्यजतेर्विभागावच्छिन्नक्रियावाचित्वात् वृक्षाद्विभेतीत्यादावपि लक्षणया पतनमेव धात्वर्थो विभागावच्छिन्नक्रियावाचकत्वे तरु
क्षत्रजातिजहातीत्यादिवद् वृक्षमपैतीत्यादिप्रमाणमेव पतिस्तु न विभागावच्छिन्नस्पंदमभिधत्ते किंतु संयोगावच्छिन्नं गुरुत्वप्रयोज्यपतनत्वजातिकं वा
क्षाद्गलतीत्यादिवद् वृक्षात्स्यंदत इत्यपि प्रयोगो भवत्येव चलिस्पंदोर्द्वयोरप्यकर्मकधातुत्वेन तद्योगस्याविशिष्टत्वात् यत्तु तरुं त्यजतीत्यत्र विभागो धात्वर्थ: कि

याजन्यविभागत्वेनापादानत्वमिव धात्वर्थतावच्छेदकीभूतफलत्वेन कर्मत्वमपीत्यपादानत्वकर्मत्वयोर्विभक्तिप्रसंगे कर्मत्वस्य परत्वात्तस्य बोधिका द्वितीयैव प्रवर्तते
न त्वपादानत्वस्य पंचमी तथैव साकांक्षत्वात् अपादानसंप्रदानकरणाधारकर्मणां कर्तुश्चोभयसंप्राप्तौ परमेव प्रवर्तते इत्यनुशासनादिति तच्चिंत्यं वृक्षाद्विभज्यते खग इत्य
त्रावधित्वं अवधितानिरूपकत्वं वा धात्वर्थान्वितत्वं पंचम्या प्रतिपाद्यते तेन वृक्षनिष्ठावधितानिरूपकविभागवान् खग इत्याकारस्तत्र बोध: स्वप्रतियोगिकसंयोगस्यैव स्वावधिक
विभागस्यापि स्वाश्रिनत्वसत्वादेवस्वस्माद्विभज्यते खग इत्यादिको न प्रयोग इत्युक्तप्रायं अवधित्वस्वरूपसंबंधप्रभेद: पदार्थांतरं वेत्यन्यदेतत् व्याघ्राद्बिभेति त्रस्यती
त्यादौ हेतुत्वं जन्यत्वं वा पंचम्यर्थ: तच्चाभाविवत्वेन स्वानिष्टचिंतनपर्यवसितस्य भयस्यैकदेशे निष्टचिंतनएववाऽन्वितं तथा च व्याघ्रहेतुकस्वहानिष्टस्मरणाविवेनचिं
तनवान् व्याघ्रहेतुकत्वेन भाव्यनिष्टधर्मिकचिंतनवान्निति वा तत्र बोध: पापान्निवर्तते धर्मात् विरमतीत्यादौ पंचम्या द्वेषोऽर्थ: तत्र प्रकृत्यर्थस्य विषयत्वेन तस्य चानि
वृत्तिरूपे धात्वर्थे जन्यत्वेनान्वय: तेन पापगोचरद्वेषजन्यानिवृत्तिमानित्येव तत्र बोध: तत्र विषयत्वं पंचम्यर्थ: तथा च पापगोचरनिवृत्तिमानित्यर्थ इत्यन्ये रणात्परा
जयत इत्यत्र युद्धनिवृत्ति: पराजेरर्थ: पंचम्यास्तु द्वेष: तेन रणगोचरद्वेषजन्ययुद्धनिवृत्तिमानित्येवं तत्र बोध: कृत्यसाध्यत्वधीप्रयुक्तप्रवृत्त्यभाववत्त्वं तत्र पराजेर
र्थ: पंचम्यास्तु विशेष्यत्वं तच्च धात्वर्थैकदेशे बुद्धावन्वितं तेन रणधर्मिकस्वकृत्यसाध्यत्वधीप्रयुक्तप्रवृत्त्यभाववानित्याकारस्तत्र बोध इत्यपि वदंति शत्रुं पराजयत
इत्यादौ त्वभिभवहेतुव्यापार: पराजेरर्थ इति धात्वर्थतावच्छेदकफलशालितया शत्रुप्रभृते: कर्मत्वमेव पापाज्जुगुप्सत इत्यत्र गर्हापूर्वकनिवृत्तिर्गुपधातोरर्थ:
सुपा विषयत्वं तेन गर्हानिवृत्त्यो: क्रमेणान्वयि तथा च पापविषयकगर्हाप्रयुक्तपापगोचरनिवृत्तिमानित्याकारकस्तत्र बोध: वल्मीकाग्रात्प्रभवति धनु: खंडमाखंडल
स्येत्यत्र धातोरर्थ: प्रकाशनं तत्र पंचम्या अधिकरणत्वं आधेयत्वं वा प्रतिपाद्यते तत्र प्रकाशनं प्रभव इति सूत्रेणाधिकरणस्यैवापादानत्वोपदेशात् एवं च वल्मीका
ग्रवृत्ति प्रथमप्रकाशनवदाखंडलस्य धनु:खंडमित्याकारस्तत्र बोध: वल्मीक: सातपो मेघ: आखंडल: शक्र: वल्मीकाग्रआविर्भवतीत्यादौ च प्रकाशपर्यवसितो
ऽप्याविर्भावो न प्रपूर्वस्य भवतेरर्थ इति तत्राधिकरणतायां सप्तम्येव प्रमाणं धर्मादुत्पद्यते सुखं दंडाज्जायते घट इत्यादौ धातुनास्वाधिकरणसमयध्वंसानाधिकरण
समयसंबंधरूपोत्पत्तिस्समयवृत्तिध्वंसप्रतियोगिसमयावृत्तित्वे सति तत्तत्समयसंबंधरूप एव वोत्साद: प्रतिपाद्यते पंचम्या च तन्निष्ठजन्यत्वं तथा च धर्मजन्यो
य: स्वाधिकरणसमयध्वंसानधिकरणसमयसंबंधस्तद्वत्सुखमित्याकारकस्तत्र बोध: पार्थिकस्तु उत्पद्यत इत्यादौ प्रागभावप्रतियोगितारूपमेवोत्पत्ति

२१-प्र. मन्वं धात्वर्थः तत्र च तिङर्थस्य वर्तमानकालस्यावच्छेद्यतासंसर्गेणान्वयात् भाविन्युत्तत इत्यादिको न प्रयोगः किंतु सत्यपत इत्यादिकः तत्र भविष्यत्कालावच्छेद्य
स्यैव प्रागभावप्रतियोगित्वस्य सत्वेन वर्तमानकालावच्छेद्यस्यासत्वात् अतएव नाशं प्राप्नोति प्राप्स्यतीत्यादावपि प्रतियोगित्वपर्यवसितायां प्राप्तौ तिङादिना वर्त
२२ मानादिकालावच्छेद्यत्वमेवानुभाव्यते ननु वर्तमानत्वादिकं तादृशप्रतियोगित्वस्य व्याप्यवृत्तित्वे भावी नाशं प्राप्नोति नष्टो नाशं प्राप्स्यतीत्यादिप्रयोग
स्य दुर्वारतापत्तेः वर्तमानं भाविकालिकं निवार्य नाशप्रतियोगित्वं नश्य भाविनि नष्टे च सत्वात् नश्यति नंक्ष्यतीत्यादावपि धात्वर्थस्य नाशस्य प्रतिमा
गित्वं स्वार्थन वर्तमानादिना कालेनावच्छिन्नं तिङा बोध्यते तेन भावी नश्यति नष्टो नंक्ष्यतीत्यादिको न प्रयोगः संप्रत्यादिकालावच्छेद्यस्य नाशप्रति
योगित्वस्य भाव्यादावसत्वात् यत्तु नश्यति नंक्ष्यति ननाशेत्यादौ प्रतियोगित्वमिव वर्तमानाभाविन्यतीतत्वोत्पत्तिरपि यथाक्रमं तिङर्थस्तथा
च वर्तमानोत्पत्तिकध्वंसस्य प्रतियोगित्वं न भाव्यादौ भाव्युत्पत्तिकस्य न नष्टादावतो भावी नश्यतीत्यादिको न प्रयोग इति दीधितिकृदुक्तं तन्न युक्तं
प्रागभावस्य चरमक्षणः ध्वंसस्य प्रथमक्षणः कथितक्रमेणैव सामञ्जस्ये उत्पत्तेरुत्पत्तावपि तिङ्संतरकल्पने गौरवात् अतएव ध्वंसप्रागभावप्रतियोगितायां पूर्वापरकालावच्छेद्यत्वप्रवादोऽपि
पक्षधरमिश्राद्युक्तो मीमांसकैः संगच्छते न चैवं प्रागभावादिप्रतियोगित्वस्य धर्माद्यजन्यत्वाद्धर्मादुत्पद्यते इत्येव सुखमित्यादेरयोग्यत्वापत्तिः सुखादेराद्यक्षण
संबन्धरूपायामप्युत्पत्तौ धर्मादिजन्यत्वे प्रमाणाभावेनोक्तदोषस्य मतान्तरेऽप्यविशिष्टत्वात् आद्यक्षणासंबन्धस्य धर्माद्यजन्यत्वेऽपि तदधीनत्वोपगमेन
पञ्चमीसमर्थने प्रागभावप्रतियोगित्वरूपायामप्युत्पत्तौ तस्य सुवचत्वादिति प्राञ्चः कूपादन्धं वारयति विषाद्बालं वारयति इत्यादौ च क्रियाधर्मिकनि
वृत्त्यनुकूलव्यापारो वारणं तन्निविष्टनिवृत्तौ पञ्चम्या कूपादिप्रकारकत्वं द्वितीयाया चान्धादिनिष्ठत्वं प्रत्याय्यते क्रिया च पतनभोजनादिविशेषतो
ग्राह्या तथा चान्धनिष्ठायाः पतनधर्मिककूपप्रकारकनिवृत्तेर्बालनिष्ठायाश्च भोजनधर्मिकविषप्रकारकनिवृत्तेरनुकूलव्यापारवान् इति तत्र बोधः २३
निवृत्त्यनुकूलव्यापारश्च स्वार्थधीहेतुः कूपे मा पतत विषं मा भुङ्क्ष्व इत्याद्यभिलाषरूपः स्फुट एव यत्तु पतनादिप्रतिकूलो व्यापारो वारणं तदुक्तदोषेऽप
तन्नाशे अन्धादेराधेयत्वेन कूपादेश्च कर्मत्वेनान्वयादन्धनिष्ठस्य कूपकर्मकपतनस्य प्रतिकूलव्यापारवानित्यादिरूपः कूपादन्धं वारयतीत्यादितो बोध
इति तदुक्तं तादृशपतनस्याप्रसिद्धिस्थले तथाविधवाक्यस्यायोग्यतापत्तेः परस्वेभ्यः पाणिं वारयतीत्यत्रानयनधर्मिकनिवृत्त्यनुकूलव्यापारो वारणं
तत्

तदन्तर्गतनिवृत्तौ च पाण्यादेरवच्छेदकत्वेन परस्वादेश्च प्रकारत्वेनान्वयः तादृशश्च व्यापारः करार्कुञ्चनादिरेव स्वाङ्गद्वारेणो वारयतीत्यत्र यद्यपि बाणनि
ष्ठस्य स्वाङ्गसंयोगस्य विरोधिव्यापारो नार्थस्तादृशसंयोगस्याप्रसिद्धेस्तथापि बाणसंयोगाभावनिष्ठायाः स्वाङ्गवृत्तितायाः प्रयोजकव्यापारवत्त्वं त
थाच संयोगाभावनिष्ठस्य प्रयोजकव्यापारस्तत्र वारणं तन्निविष्टे च संयोगे द्वितीयान्तलभ्यस्य बाणप्रतियोगिकत्वस्य संयोगाभावनिष्ठे च पञ्चम्यन्तलभ्यस्य
स्वाङ्गवृत्तित्वस्यान्वयः कार्याभाववत्तानिष्ठ अधिकरणविशेषवृत्तित्वेऽपि प्रतिबन्धकस्य प्रयोजकत्वात् अतएव मणिः काष्ठदाहाभावस्य प्रयोजको न तु पाथस इत्यादिकः
सार्वलौकिको व्यवहार इति बाणसंयोगाभावनिष्ठस्य स्वाङ्गवृत्तित्वस्य प्रयोजकत्वं बाणाप्रसारणादिव्यापारस्य नासिद्धं दण्डाद्घट इत्यादौ पञ्चम्यर्थजन्यत्वादिकं न का
रकं धात्वर्थान्वयित्वात् अतएव दण्डाद्घटः इत्यादिकस्तत्र न प्रयोग इत्युक्तप्रायं संप्रदानत्वं लक्षयति गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विग्रहस्थया यः स्वार्थो बोधनीयस्त
त्संप्रदानत्वमिति गत्यादिभिन्नेत्यत्र तूपलक्षणं यादृशार्थे विग्रहस्थया चतुर्थ्या यादृशार्थो बोधयितुं न शक्यते स तत्र तूपलक्षणं तादृशक्रियायां संप्रदानत्वमुच्यते ब्रा
ह्मणाय दानं धनस्येत्यादौ ददातिः स्वत्वजनकत्यागार्थस्तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र संप्रदानत्वं ब्राह्मणप्रतियोगि
कं यद्वृत्तित्वं तज्जनकत्यागत्वं तत्र प्रत्ययार्थः धात्वर्थतावच्छेदकीभूतस्वत्वत्वावच्छिन्नफलवत्तया धनादेः दानकर्मत्वात् न चैवं पशुकामनया यागकरणदशायां चैत्रः
स्वात्मने पशुं ददातीत्यपि प्रयोगापत्तिः तादृशयागस्य चैत्रीयपशुनिष्ठस्वत्वजनकत्यागत्वादिति वाच्यं स्वत्वध्वंसकक्रियापर्यवसन्नस्य त्यागस्यैकदेशे स्व
त्वध्वंसेऽपि द्वितीयार्थस्यान्वयेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वंसस्याजनकत्वविरहादेव तद्वाक्यस्याप्रमाणत्वात् ग्रामाय गच्छतीत्यादौ विग्रहस्थचतुर्थ्या
धात्वर्थे बोध्यमपि कर्मत्वं न गत्यादिभिन्ने वृक्षाय सेचक इत्यादौ गत्यादिभिन्ने चतुर्थ्या बोधनीयोऽपि संबन्धरूपनिरूपितत्वमित्यादि तु मर्चोऽनविग्रहस्थयेति न तत्र प्रसङ्गः
संप्रदानशब्दस्य स्वाश्रयगोचरत्यागजन्यस्वत्वस्य प्रतियोगिन्येव शक्तेरिति स्वत्वप्रतियोगित्वं संप्रदानत्वमित्यादिको न प्रयोगः न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः सत्त
विनागमधर्म्यो दायः क्रयः जयः प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च इत्यादिमन्वादिवचनैः सत्यस्वत्वहेतुत्वावगतेः प्रतिपादनादिति वाच्यं ब्राह्मणाय सत्का
यं गवि येयोदियं ब्राह्मणस्य नमेत्यादि सर्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमिति वचनाच्च अतएव ब्रह्मदेशस्थं पात्रमुद्दिश्य सङ्कल्पितधने स्वीका
रमन्तरेणैव पात्रस्य मरणोत्तरकालेऽपि तदायत्वेन तद्धनं पुत्रादिभिर्विभज्यत इति अन्यथा तैरिवोदासीनैरपि तद्धनस्याग्रहणप्रसङ्गे कुमारादेरिवोपादानेऽर्थ

ऽ ष्टतकादिः सत्किंकरपालादिः ऽ

श०प्र० कृविनियोगे च प्रसवायोनस्यात् न चैवं दानादेरेव स्वत्वसिद्धेः दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न लब्ध्वा सहगुणं पुण्यमिति स्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशे
षं प्रति हेतुत्वेन तादृशदानसंप्रदानार्थमेव प्रतिग्रहस्योपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादिशास्त्रात् [illegible] स्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोध
२४ नाच्च स्वत्वजनकव्यापारस्यैवार्जनपदार्थत्वात् दासाय भक्ष्यं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकत्वेन ता
दृशदानमवैधत्वात् यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्त्यागोऽपि न मनसा पात्रमुद्दिश्य [illegible] तु न दानं किंतु त्यागमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुत्वज
वैधत्यागस्यैव तत्त्वात् उपेक्षातु स्वत्वध्वंसजनकस्त्यागः न तु तत्र स्वत्वजनकत्वं [illegible] तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वा
त् तिलानत्र प्रतियच्छति तुरगान् [illegible] विक्रीणाति इत्यादौ द्रव्यान्तरग्रहणपूर्वकं दानमेव प्रतिदानं मूल्यग्रहणपूर्वकमेव दानं च विक्रय इति तत्रापि मुख्यमेव संप्र
दानत्वं चतुर्थ्या बोध्यते तिलादिकं [illegible] मूल्यं पणपुराणादेरेव [illegible] तथालोपदेशात् अदृष्टार्थस्यैव दानस्यैव च स्वीकारः प्रतिग्रह इति परेणापि तस्य विक्रीतस्य तिल
तुरगादेः स्वीकारो न दोषावहः मैत्राय रोचते मोदक इत्यत्र चतुर्थी धात्वर्थान्वितमाधेयत्वं धातुना च [illegible] प्रकारके [illegible] तिङा [illegible]
व विषयत्व [illegible] तथा च मैत्रनिष्ठाया [illegible] विषयता [illegible] मोदक इत्याकारस्तत्र बोधः गुरवे गां धारयतीत्यत्र धृङ् [illegible]
तीयया तदन्वितकर्तृत्वं चतुर्थ्या च तन्निविष्ट [illegible] संबंधित्वमुपस्थाप्यते तेन गोकर्तृ [illegible] गुरुसंबंधि [illegible] व्यापारवान् [illegible]
स तत्र बोधः धातोर्न [illegible] पाणिनीयास्तु धारेरुत्तमर्ण इति सूत्रानुसारात् [illegible] गुरवे गां धारयते [illegible]
पि [illegible] चतुर्थ्यर्थः तथा च गुरुदत्तां गामप्राप्तेन [illegible] तत्र बोधः [illegible] पुत्राय २४
देयत्वेन शाध्यति पुत्रायेत्यत्र [illegible] तेन पुत्रस्य देवं निरूपयतीत्येवं तत्र बोधः गुरवे गां प्रतिशृणोति आशृणोति
इत्यादौ देयत्वेनाभ्युपगमः [illegible] तत्र गोगत [illegible] तेन गुरोरुद्देश्यत्वेनान्वयः [illegible] अभ्युपगच्छतीत्येवं तत्र बोधः होत्रे प्रतिगृ
णाति अनुगृणातीत्यादौ हर्षानुकूलव्यापारलक्षणं प्रोत्साहनं गृणातेरर्थः तदेकदेशे हर्षे होत्रादेरन्वयः तेन होतृनिष्ठहर्षानुकूलव्यापारवानित्येवं तत्र
बोधः मैत्राय क्रुध्यति [illegible] धात्वर्थ [illegible] संप्रदानत्वं चतुर्थ्या बोध्यते तेन चैत्रविषयकोत्कटद्वेषवानित्याकारस्तत्र बोधः पुत्रे कोपा

न्युज्यते इत्यादौ क्रुधंतस्य कोपपदस्यैवार्थे पुत्रशब्दस्यैवान्वयो न तु धात्वर्थे [illegible] धात्वर्थैकदेशे [illegible] विषयत्वं बोध्यते तत्रोद्देश्यत्वमेव
चतुर्थ्यर्थः कथमन्यथा [illegible] निर्माणे [illegible] प्रयोगः [illegible] मित्राय द्रुह्यतीत्यत्र द्रोहाचरणं द्रोहस्तेन मैत्रस्य द्रोहमाचरतीत्यर्थः
शिष्याये ईर्ष्यतीत्यत्रानिष्टानुपेक्षणमीर्ष्या तथा च शिष्यस्यानिष्टं नोपेक्षते इत्यर्थः पुत्रायासूयतीत्यत्रासूया गुणद्वेषः तेन पुत्रस्य गुणद्वेषवानित्याकारस्तत्र बोधः मित्रं द्रु
ह्यति शिष्यमीर्ष्यति पुत्रमसूयतीत्यपि प्रयोगात् क्रुधद्रुह कर्मणा संप्रदानत्वं वैकल्पिकमिति उन्नीयते कोपपूर्वकस्य द्रोहादेः क्रुधद्रुहादिधातुवाच्यत्वे तत्कर्मणः संप्रदा
नत्वं द्रोहादिमात्रस्य तथात्वे तु कर्मत्वमेवेति यूनः [illegible] क्रुधद्रुहोः कर्मणः कर्मत्वे न तु संप्रदानता अत एव शिष्यस्याभिक्रुद्ध मित्र
स्याभिद्रोढेत्यादौ [illegible] कर्मणि षष्ठ्येव प्रमाणं करणत्वं करणत्वमिति योऽर्थो विकरणाख्यस्य धातोरर्थे तृतीयया बोध्यते करणं नाम कारकं तदितरत्वे सति करण
स्य यत्तातोरूपस्थाप्य यादृशेऽर्थे तृतीयया यादृशः स्वार्थोऽनुभाव्यते स तद्धातूपस्थाप्य तादृशार्थे [illegible] करणत्वं कारकमुच्यते तत्र [illegible]
इत्यादौ धात्वर्थे छिदाया दात्रस्य व्यापारद्वारा जन्यत्वादि ज्ञानादौ च परत्वादेः प्रकारत्वादि तृतीयया बोध्यत इति तदेव तत्र करणत्वं चैत्रेणापक्वमित्यादौ धातोरर्थे तृ
तीयया बोध्यमपि कर्तृत्वं न विकरणाख्यस्य [illegible] विकरणतावच्छिन्नो [illegible] एव [illegible]
प्रतिसंधीयमानं विकरणमस्तीति मतेनेदं [illegible] करणशब्दस्तु व्यापारप्रयोजक [illegible] जनकस्य वाचकः [illegible]
येनानुमित्यादौ व्याप्तिज्ञानादिः परामर्शादीनां स्मृत्यादावनुभवादिः संस्कारादिना स्वव्यापारेणैव संबंधेन हेतुः शरीरे [illegible] ज्ञानादौ [illegible]
नैवात्मनः [illegible] तत्र करणत्वप्रसंगः श्रावणेऽपि [illegible] कर्णावच्छिन्नशब्दात्मना व्यापारेणैव संबंधेन श्रोत्रं करणं [illegible]
ते शब्दसामान्याभावस्य श्रावणत्वविरहेऽपि [illegible] नन्वेतस्य श्रावणाभावे [illegible] अत आह श्रोत्रमनसोः संयोग एव
वा तत्र व्यापारः ज्ञानस्य धारावाहनस्थले च तृतीयादिकं प्रति द्वितीयादिकं न प्रथमादेः [illegible] तत्संबंधेन हेतुत्वेमानाभावात् फलायोगव्यवच्छिन्नं फलोप
धायकं वा कारणमेव करणं ज्ञानादावात्मादेः करणत्वस्येष्टत्वात् उपधेयसंकरेऽपि कारकत्वकरणत्वाद्युपाधेरसांकर्यादेव कारकस्य षड्विधत्वात् अत एव
आत्मानमात्मना वेत्सि सृजस्यात्मानमात्मनेत्यादिः प्रयोगः अत एव च विवक्षातः कारकविभक्तयो नाना भवन्तीत्यपि प्रवादः संगच्छते पशुना रुद्रं यजत इत्यत्र
पशुं रुद्राय ददातीत्यर्थः करणे कर्मणः यजेः कर्मणश्च संप्रदानमित्यनुशासनात् कर्मत्वादावपि तृतीयादेः साधुत्वात् एतदुदाहरणमात्रविषयानुशिष्टिरियमि

श०प्र० विष्ट्रः पायसेन विष्णुं यजेत इत्यादि प्रयोगापत्तेः सामान्यत एव सपरे दंडेन घट इत्यत्रापि तृतीयार्थः करणत्वं परं तु तन्न कारकं क्रियानन्वयित्वात् अधिकरणं लक्षयति
यत् क्रियायां याद्रूप्येणार्थः सप्तम्या विग्रहरूपया बोध्यस्तस्यां तदेवाधिकरणं नाम कारकं क्रिया धात्वर्थस्तथा च यद्रूपेण परस्थाप्याद्यर्थे विग्रहरूपया सप्त
२५ म्याय स्वार्थोऽनुभाव्यते तदेव तद्रूपेण परस्थाप्य तादृशक्रियायामधिकरणत्वं नाम कारकं ग्रामं गतेऽत्र विग्रहे धात्वर्थे गतौ ग्रामनिष्ठमधिकरणत्वं तन्निरू
पितमाधेयत्वं वा सप्तम्यानुभाव्यत इति तदेव तत्राधिकरणत्वकारकमत एव ग्रामंगत इत्यादिकस्तत्र समासः यद्यपि चैत्रनिष्ठायां गतेः समवायादि
ना ग्रामादिवृत्तित्वं वाचितं कालिकादिना तद्वृत्तित्वं वातिप्रसक्तं स्पंदे गच्छतीत्यपि प्रयोगापत्तेः तथापि ग्रामे गच्छतीत्ययं न त्वग्रहाद् [illegible] साक्षि
केण स्वरूपसंबंधविशेषेण तथात्वं बोध्यं यत्तु संयोगावच्छिन्नाक्रियायां गतित्वात्तन्निविष्टसंयोगे समवायेनैव ग्रामवृत्तित्वसहानासंगतिरि
ति तन्न ग्रामादेर्धात्वर्थतावच्छेदकीभूतफलान्वयित्वे कर्मतापत्त्या ग्रामं गच्छतीत्येवानियमतः प्रयोगापत्तेः विक्लित्त्यवच्छिन्नक्रियायाः पाकत्वेन
तस्यामिव तन्निविष्टविक्लित्तावपि समवायादिना स्थाल्यादिवृत्तित्वासंभवेन स्थाल्यां पचति तंडुलमित्यादौ तथाप्यप्रतीकाराच्च तंडुलादेरव
यविभागप्रसंगे तस्यैव विक्लित्तत्वादिति घटत्वं घटेऽभासत इत्यत्र विषयता विशेषपर्यवसन्नेऽभासते घटनिष्ठविशेष्यत्वं अवच्छेद्यतासंबंधेन स
प्तम्यानुभाव्यत इति तत्रापि तदेवाधिकरणता नाम कारकं ज्ञाने घटत्वं भासत इत्यादौ तु निरूपितत्वमपि घटे पटत्वं जानातीत्यादौ विशेष्यतारूपः स
प्तम्यर्थोऽनन्वयत्वेति घटपटयोस्तादृप्येण प्रमात्वे [illegible] पितादृशप्रयोगापत्तेः परं तु द्वितीयार्थे पठत्वप्रकारित्व एवावच्छेद्यत्वसंबंधेन यथा च सुबर्थयो
र्मिथोऽन्वये [illegible] भाव इष्यते अधिकरणस्यैव पदस्य शक्यतावच्छेदकत्वं तु न संबंधमात्रं घटादावात्मनस्तदधिकरणतापत्तेः इति नियामकसंबंधस्तत्रेष्यते न कुंडा
दौ बदरादेरिव बदरादावपि कुंडादेरधिकरणतापत्तेः इति नियामकत्वस्याधिकरणतावच्छेदकत्वे पर्यवसानात् नाप्याधेयतानिरूपकत्वमधिकरणत्वं २५
तुल्यन्यायेनाधिकरणता निरूपकत्वस्यैवाधेयतात्वेन परस्पराश्रय प्रसंगात् परं त्वाधेयतावत् पदार्थांतरमेवाधारत्वं तद्भिन्नैकं सर्वस्य सर्वाधिकर
णतापत्तेः किं त्वाधेयताभेदाभाने [illegible] रूपत्वादिना रूपादेरिवाधिकरणता त्वादिनैवाखंडेन तस्य न चैवं धर्मावच्छिन्नस्याधिकरण
त्वं लाघवात् कर्मबोधित रूपत्वेन नीलस्याधिकरणं स्फटिकमित्यपि प्रयोगापत्तेः अत एव तद्रूपरसयोः समानियतत्वमपि अधिकरणत्वाविभिन्नमे
व अन्यथा तद्रूपत्वेन तद्रसस्याधिकरणं घट इत्यादेरपि योग्यतापत्तेरित्यास्तां विस्तरः कर्मत्वकारकं लक्षयति यद्गत धात्वर्थ [illegible] तिङा

र्थोऽनुभाव्यते यत्रासौ कर्मतो नाम कारकं कर्तृभेतरः यद्गतस्य यद्रूपेण [illegible] रुत्तरस्य तिङा यत्र स्वार्थे तदीयो यादृशार्थोऽनुभावयितुं शक्यते तद्रूपेण परस्थाप्यतादृशक्रिया
यां सति द्व्यर्थः कर्तृतावच्छिन्नः कर्मत्वं नाम कारकमित्यर्थः ग्रामो गम्यत इत्यत्र गमधातूपस्थाप्यायाः संयोगावच्छिन्नक्रियायाः स्वजन्यत्वसंबंधेन तिङुपस्थाप्यसंयोग
एवान्वयो न तु संजात इत्याद्यविवादि विभागादे धात्वर्थतावच्छेदकस्यैव फलस्य बोधने कर्मविहितप्रत्ययानां धातुसाकांक्षत्वात् तः संयोग एव तत्र गतिक्रि
याया कर्मत्वं न तु विभागादि तेन तरोस्त्यागिनि खगे तरुं गच्छतीत्यादिकोऽनप्रयोगः गम्यते रथः स्वयमेवेत्यादौ कर्मत्वानिवानुकूलव्यापारवत्त्वलक्षणं कर्तृ
त्वं धात्वर्थस्य धर्म्यपि न तत्कर्तृताभिन्नमिति न व्युदासः ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्राम इव चैत्रेऽपि सत्त्वात् चैत्रेण गम्यते चैत्र इत्यादिकोऽपि प्रयोगः
स्यात् तस्यात्तिङर्थसंयोगे स्वजन्यत्वस्वाश्रयप्रतियोगिकत्वोभयसंबंधेनैव धात्वर्थगतेः साकांक्षत्वेन चैत्रकर्तृकगत्याश्रयप्रतियोगिकत्वविशिष्टसंयो
गस्य चैत्रे बाधितत्वात् अत एव चैत्रो ग्रामं गच्छतीतिवच्चैत्रं गच्छतीत्यपि न प्रयोगस्तत्रापि द्वितीयार्थसंयोगप्रकृत्यर्थस्य स्वप्रतियोगिकत्वसंबंधेनैव साकां
क्षतया द्वितीयातत्पदस्य चैत्रीयत्वविशिष्टसंयोगस्य जनकत्व स्वाश्रयवृत्तित्वोभयसंबंधेनैव क्रियायामन्वयेन चैत्रप्रतियोगिकसंयोगाश्रयवृत्तिग
तेश्चैत्रे बाधितत्वात् यत्तु फलमिव क्रियायामन्वितपरसमवेतत्वमपि कर्मतावाचिप्रत्ययस्यार्थः परत्वं च तिङर्थस्वार्थफलान्वयिप्रतियोगिकं द्वितीयादि
सुपानुप्रकृत्यर्थप्रतियोगिकं प्रत्याप्यते तथा चैत्रकर्तृकस्य चैत्रान्यसमवेतगमनस्याप्रसिद्धत्वेन चैत्रे तज्जन्यसंयोगस्यासंभवात् चैत्रेणागम्यते चैत्र इत्यादि
कोऽनप्रयोगः एवं चैत्रान्यसमवेतस्य गमनस्य चैत्रे बाधा चैत्रश्चैत्रं गच्छतीत्यादेरपि चैत्रेणागम्यते ग्राम इत्यादौ तु चैत्रकर्तृकस्य ग्रामभिन्नसमवेतस्य गमनस्य
जन्यो यः संयोगस्तद्वान् ग्राम इत्यन्वयबोधने न किंचिद्बाधकमिति प्राच्यैरुक्तं तन्न युक्तं संख्यामात्रानुलापितिङर्थस्य तिङर्थस्य धात्वर्थविशेष्यत्वनियमेन तिङर्थपर
समवेतत्वादेर्धात्वर्थगत्यादौ अन्वयायोगात् प्रथमांतपदोपस्थाप्यग्रामादेरभेदान्यसंबंधेनान्यत्र प्रत्ययार्थे तिङर्थेवान्वयस्यादृष्टचरत्वेनाव्युत्पन्नत्वात् चैत्रेण
गम्यते द्रव्यं द्रव्यं गच्छति चैत्र इत्यादौ द्रव्यान्यसमवेतस्य गत्यादेरप्रसिद्धत्वेनायोग्यतापत्तेश्च नव्यास्तु फलमिव प्रदेयिकमेवाविप्रत्ययस्यार्थस्तथा च चैत्रे
णगम्यते ग्राम इत्यत्र तिङर्थभेदस्य सामानाधिकरण्यसंबंधेन धात्वर्थविशेष्यत्वात् प्रतियोगित्वसंबंधेन च प्रथमांतार्थग्रामादौ विशेषणत्वाभ्युपगमान्निवि
रोधो न वातिप्रसंगः चैत्रकर्तृकगमनाश्रयवृत्तिभेदप्रतियोगित्वस्य चैत्रे विरहात् चैत्रं गच्छतीत्यादावपि प्रतियोगित्वसंबंधेन चैत्रान्वितस्य द्वितीयार्थ
भेदस्य सामानाधिकरण्यसंबंधेन धात्वर्थगतावन्वयात् तादृशगतेश्च चैत्रे बाधात् चैत्रं गच्छति चैत्र इत्यादिकोऽनप्रयोगः प्रतियोगित्वं चोभयावृत्ति
धर्मावच्छिन्नं धर्मद्वयानवच्छिन्नं वा ग्राह्यमतो द्रव्यं गच्छतीत्यादौ गतेर्द्रव्यभेदसामानाधिकरण्यविरहेऽपि न क्षतिरित्याहुः तच्चिंत्यं इत्थं खगमत
चिंताबीजं तु गम्यते रथः स्वयमेवेत्यादौ
अगतिः ॥

तीत्यादौ विभागावच्छिन्नक्रिया त्यजेरर्थः द्वितीयायास्तु विभागस्तेन वृक्षावधिकविभागवतीया विभागावच्छिन्नक्रियातद्वान् खगः इत्याकारस्तत्रबोधः वृक्षावधिकविभागवत्त्वं च जनकत्वस
श॰प्र॰ श्रयत्वमिति बोध्यम् स्वं च जनकत्वसम्बन्धेनैव क्रियायां ग्राह्यं अतः खगाद्यवधिकविभागस्य खगादावसत्वात् खगं त्यजति खगो वृक्षादित्यादौ न प्रयोगः खगेन त्यज्यते खगद्वत्स इत्यादिप्रयोगः प्रागुक्तरीत्या निरसनी
२६ यः प्राञ्चस्तु ग्रामं गच्छति त्यजतीत्यादौ सर्वत्र क्रियामात्रं धात्वर्थः त्यजिगम्योः पर्यायत्वेपि स्वभावात् गम्यर्थक्रियायां संयोगस्यैव त्यजर्थक्रियायां विभागस्यैव बोधकतायाः
कर्मप्रत्ययेष्वपि तुल्यत्वात् तरुं त्यजतीत्यादौ संयोगस्य तरुं गच्छतीत्यादौ विभागस्य द्वितीयादितो नावगमः परैरपि समभिव्याहृतधात्वर्थतावच्छेदकफलस्यैव द्वितीयादिबोध्यताया
स्वीकारानुपपत्तेरभावात् अन्यथातिप्रसंगात् न चैवं स्पन्दो न स्पन्दते इत्यादौ रिवसागो न गतिरित्यादावपि वाक्यस्य निराकाङ्क्षतापत्तिः तत्र त्यजिगम्योर्विभागाद्यवच्छिन्नक्रियालक्षकत्वेनैव अन्व
ययोग्यत्वसंभवात् द्वितीया साकाङ्क्षत्वमत धात्वप्रयुक्तं सर्वधातूनां सकर्मकत्वव्यपदेशान्न तु फलावच्छिन्नक्रियावाचित्वप्रयुक्तः तत्प्रसिद्धताव्याप्यत्वात् सर्वधातूनां कर्मविभक्त्य
द्वद्वितीयाया अपि साधुत्वात् एवं च ग्रामं गच्छति तरुं त्यजतीत्यादौ ग्रामसंयोगजनकक्रियावांस्तरुविभागजनकक्रियावानित्याकारको बोधो न तु ग्रामसंयोगजनकसंयोगा
वच्छिन्नक्रियावांस्तरुविभागजनकविभागावच्छिन्नक्रियावानित्याकारकः संयोगविभागयोरुभयथा भानस्य नीलघटजनकघटजनकदण्डवानित्यादौ घटादेरिव निराकाङ्क्षत्वेनासं
भवात् दुष्टत्वबाधितत्वाच्चेत्याहुः परे तु संयोगः क्रियावच्छेद्यमेव प्रत्येकं गमित्यज्योर्जन्यजनकभावस्तु वा कार्थमर्यादया भासते एवार्थयोरन्ययोगव्यवच्छेदयोरिव गम्यर्थयोः सं
योगक्रिययोर्मिथ एव साकाङ्क्षत्वात् अनेकमात्रे गमिप्रयोगः पुष्पवन्तपदं चन्द्रसूर्यत्वाभ्यामिव विभिन्नरूपाभ्यां प्रकृतेपि संयोगत्वक्रियात्वाभ्यां गमधातोरेव शक्तिस्वीकारे
दिनष्टमिति रियांस्तु विशेषो यत्तत्र सूर्यशशिनोर्मिथो नान्वयः प्रकृते तु संयोगक्रिययोस्तथेति तथा च ग्रामं गच्छतीत्यत्र च द्वितीयाया आधेयत्वं प्रतियोगित्वं वार्थः तेन तदन्वि
तस्य संयोगस्य क्रियायामन्वयात् ग्रामवृत्तिसंयोगप्रतियोगिको वा यः संयोगः तद्विशिष्टक्रियावानित्याकारस्तत्र बोधस्तरुं त्यजतीत्यत्राप्याधेयत्वं अवधित्वं वा द्वितीयार्थः
तेन तदन्वितस्य धात्वर्थविभागस्य धात्वर्थान्तरक्रियायामन्वयात् तरुवृत्तिस्तदवधिको वा यो विभागस्तद्विशिष्टक्रियावानित्याकारको बोधः संयोगादि वैशिष्ट्यं च तु
जनकत्वस्वाश्रयवृत्तित्वोभयसंबन्धेनैव प्रागिव ग्राह्यमतो नातिप्रसंगः सकर्मकत्वमपि धातोः स्वार्थफलावच्छिन्नस्वार्थक्रियान्वयबोधकत्वं जानातीत्यादौ तु सकर्म
कत्वव्यवहारो भाक्त इति प्राहुः तंडुलं पचतीत्यत्र रूपादिपरावृत्तिफलकतेजःसंयोगावच्छिन्नक्रिया पचेरर्थः तन्निष्ठत्वं निरूपकत्वं तेजःसंयोगे तण्डुलस्याधेयत्वेनान्वयः २६
परमाणुं पचतीत्यपि प्रयुक्त एव अतः स्वतंत्राः परमाणवः पच्यन्ते इति किरणावल्यामाचार्याः कुदनं पचतीत्यादौ तंडुलादावोदनपदस्य लक्षणा तत्र क्रियाया
मन्वितमनुकूलत्वं द्वितीयार्थः इत्यपि केचित् तृणं छिनत्तीत्यादावारंभकसंयोगविरोधिविभागावच्छिन्ना क्रिया छिदेरर्थस्तत्रान्वितविभागे च तादृशविभा
गे स्वाश्रयत्वमवच्छिन्नत्वसंबन्धेन तृणादेरन्वयः पुष्पेण विष्णुं यजतीत्यत्र प्रीत्यवच्छिन्नस्वमंत्रकद्रव्यत्यागो यजेरर्थः प्रीतौ च विष्णोराधेयत्वेन
द्रव्ये च पुष्पादेरभेदेनान्वयस्तेन विष्णुनिष्ठप्रीतिहेतुर्यो मंत्रकरणकः पुष्पाभिन्नस्वद्रव्यस्य त्यागस्तद्वानित्याकारस्तत्रबोधः